তামবস্থাং প্রাপ্স্যন্তীত্যর্থঃ । অনেকেতি । অনেকেষু মনোরথেষু প্রবৃত্তং অনেকচিত্তং তেন বিভ্রান্তা বিক্ষিপ্তাঃ তেনৈব মোহময়েন জালেন সমাবৃতাঃ । মৎস্যা ইব সূত্রময়েন জালেন যন্ত্রিতা অতএব কামভোগেষু প্রসক্তা অভিনিবিষ্টাঃ সন্তো
দুষ্টে নরকে পতন্তি ॥ ১৬ ॥ যক্ষ্যে দাস্যামীত্যাদি যস্তেষাং মনোরথ উক্তঃ স কেবলং দম্ভাহঙ্কারাদিপ্রধানঃ ন তু সাত্ত্বিক ইত্যাহ ত্রিভির্য়েনাহ । আত্মনৈব সম্ভাবিতাঃ পূজ্যতাং নীতাঃ ন তু সাধুভিঃ কৈশ্চিৎ অতএব
স্তব্ধা অনম্রাঃ ধনেন যো মানঃ মদশ্চ তাভ্যাং সমন্বিতাঃ । তে নামমাত্রেণ যে যজ্ঞাস্তে নামযজ্ঞাঃ দীক্ষিতঃ সোমযাজীত্যেবমাদিনামমাত্রসিদ্ধয়ে যে যজ্ঞাস্তৈর্য়জন্তে কথং দম্ভেন ন তু শ্রদ্ধয়া অবিধিপূর্ব্বকং চ
যথা ভবতি তথা ॥ ১৭ ॥ অবিধিপূর্ব্বকমেব প্রপঞ্চয়তি অহঙ্কারাদীন্ সংশ্রিতাঃ সন্তঃ আত্মপরদেহেষু স্বদেহেষু চ চিদংশেন স্থিতং মাং প্রদ্বিষন্তো যজন্তে দম্ভযাজিনঃ শ্রদ্ধায়া অভাবাৎ । আত্মনো ইষ্টৈরপীড়া ভবতি ত

গী০

অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ ২ প্রসক্তাঃ কামভোগেষু পতন্তি নরকেঽশুচৌ ॥ ১৬ ॥ আত্মসম্ভাবিতাঃ স্তব্ধা ধনমানমদান্বিতাঃ ২ যজন্তে নামযজ্ঞৈস্তে দম্ভেনা-
বিধিপূর্ব্বকং ॥ ১৭ ॥ অহঙ্কারং বলং দর্পং কামং ক্রোধঞ্চ সংশ্রিতাঃ ২ মামাত্মপরদেহেষু প্রদ্বিষন্তোঽভ্যসূয়কাঃ ॥ ১৮ ॥ তানহং দ্বিষতঃ ক্রূরান্ সংসারেষু নরাধমান । ক্ষিপাম্যজস্রমশু-
ভানাসুরীষ্বেব যোনিষু ॥ ১৯ ॥ আসুরীং যোনিমাপন্না মূঢা জন্মনি জন্মনি । মামপ্রাপ্যৈব কৌন্তেয় ততো যান্ত্যধমাং গতিং ॥ ২০ ॥ ত্রিবিধং নরকস্যেদং দ্বারং নাশনমাত্মনঃ ২
কামঃ ক্রোধস্তথা লোভস্তস্মাদেতত্ত্রয়ং ত্যজেৎ ॥ ২১ ॥ এতৈর্ব্বিমুক্তঃ কৌন্তেয় তমোদ্বারৈস্ত্রিভির্নরঃ ২ আচরত্যাত্মনঃ শ্রেয়স্ততো যাতি পরাং গতিং ॥ ২২ ॥

স্যাপরাদীনামপ্যবিধিনা হিংসায়াং চৈতন্যদ্রোহমেবায়মিষ্টবন্তো ভবন্তি প্রদ্বিষন্তো ইত্যুক্তং । অভ্যসূয়কাঃ সন্মার্গবর্ত্তিনাং গুণেষু দোষারোপকাঃ ॥ ১৮ ॥ তেষাঞ্চ কদাচিদপ্যাসুরস্বভাবপ্রচ্যুতির্ন্ন ভবতীত্যাহ তানহমিতি । সংসারে
অজস্রং জন্মসু মার্গেষু আসুরীষ্বেব রাক্ষসব্যাঘ্রসর্পাদিযোনিষু অজস্রমনবরতং ক্ষিপামি । তেষাং পাপকর্ম্মণাং তাদৃশং ফলং দদামীত্যর্থঃ ॥ ১৯ ॥ কিঞ্চ আসুরীমিতি । তে চ মামপ্রাপ্যৈব ততোঽধমাং গতিং প্রাপ্নুবন্তি ক্বাপি । কুতঃ
তেষাং সংপ্রাপ্ত্যুপায়ঃ সন্মার্গমপ্রাপ্য ততোঽধমাং গতিং যান্তীত্যুক্তং শেষসপ্তং ॥ ২০ ॥ উক্তানামাসুরস্বভাবানাং দোষাণাং মধ্যে সকলদোষমূলভূতদোষত্রয়ং সর্ব্বথা বর্জনীয়মিত্যাহ । কামঃ ক্রোধশ্চ লোভশ্চেতি যদিদং ত্রিবিধং
নরকস্য দ্বারং অতএব আত্মনো নাশনং নীচযোনিপ্রাপকং তস্মাদেতত্ত্রয়ং সর্ব্বাত্মনা ত্যজেৎ ॥ ২১ ॥ ত্যাগে চ বিশেষফলমাহ এতৈরিতি । তমসো নরকস্য দ্বারভূতৈরেতৈস্ত্রিভিঃ কামাদিভির্ব্বিমুক্তো নরঃ আত্মনঃ শ্রেয়ঃ সাধনং তপো যো

কামাদিত্যাগশ্চ স্বধর্ম্মাচরণং বিনা ন সম্ভবতীত্যাহ : য ইতি : শাস্ত্রবিধিং বেদবিহিতধর্ম্মমুৎসৃজ্য যঃ কামকারতঃ যথেষ্টং বর্ত্ততে : স সিদ্ধিং তত্ত্বজ্ঞানং ন প্রাপ্নোতি : ন চ সুখং উপসমং ন চ পরাং গতিং মুক্তিং প্রাপ্নোতি ॥ ২৩ ॥ ফ
লিতমাহ তস্মাদিতি ইদং কার্য্যমিদং কার্য্যমিত্যস্যাং ব্যবস্থায়াং তব শাস্ত্রং শ্রুতিস্মৃতিপুরাণাদিকমেব প্রমাণং : অতঃ শাস্ত্রবিধানোক্তং কর্ম্ম জ্ঞাত্বা ইহ কর্ম্মণি বর্ত্তমানঃ যথাধিকারমেব : কর্ত্তুমর্হসি : তন্মনসাং সত্ত্বশুদ্ধিঃ সম্যক্ত
নেশ্বজীনামিত্যর্থঃ ॥ ২৪ ॥ দৈবাসুরসম্পত্তিসংক্ষিপ্তা যেন ষোড়শে । তত্ত্বজ্ঞানাধিকারস্তু সাত্ত্বিকস্যেতি দর্শিতঃ ॥ ইতি গীতাটীকায়াং সুবোধিন্যাং ষোড়শোঽধ্যায়ঃ ॥ * ॥ উক্তাধিকারহেতুশ্রদ্ধায়াঃ সাত্ত্বি
কী । ইতি সপ্তদশে গৌণশ্রদ্ধাভেদশ্চ বর্ণ্যতে ॥ পূর্ব্বাধ্যায়ান্তে যঃ শাস্ত্রবিধিমুৎসৃজ্যেত্যাদিনা শাস্ত্রোক্তবিধিমুৎসৃজ্য কামকারেণ বর্ত্তমানস্য জ্ঞানে অধিকারো নাস্তীত্যুক্তং : তত্র শাস্ত্রবিধিমুৎসৃজ্য কাম

যঃ শাস্ত্রবিধিমুৎসৃজ্য বর্ত্ততে কামকারতঃ । ন স সিদ্ধিমবাপ্নোতি ন সুখং ন পরাং গতিং ॥ ২৩ ॥ তস্মাচ্ছাস্ত্রং প্রমাণন্তে কার্য্যাকার্য্যব্যবস্থিতৌ ।
জ্ঞাত্বা শাস্ত্রবিধানোক্তং কর্ম্ম কর্ত্তুমিহার্হসি ॥ ২৪ ॥ * ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু দৈবাসুরবিভাগো নাম ষোড়শোঽধ্যায়ঃ ॥ * ॥
অর্জ্জুন উবাচ ॥ যে শাস্ত্রবিধিমুৎসৃজ্য যজন্তে শ্রদ্ধয়ান্বিতাঃ । তেষাং নিষ্ঠা তু কা কৃষ্ণ সত্ত্বমাহো রজস্তমঃ ॥ ১ ॥

কারেণৈব শ্রদ্ধয়া বর্ত্তমানানাং কিমধিকারোঽস্তি নাস্তি বা ইতি বুভুৎসয়া অর্জ্জুন উবাচ : য ইতি : অত্র শাস্ত্রবিধিমুৎসৃজ্য যজন্তে আলস্যেন শাস্ত্রার্থং দৃষ্ট্বা তদনুষ্ঠানে বর্ত্তমানা নানুতিষ্ঠন্তে । তেষাং শ্রদ্ধয়া যজনাৎ
পারত্র্যাস্তিক্যবুদ্ধিঃ শ্রদ্ধা ন চাসৌ শাস্ত্রবিরুদ্ধেষু অর্থেষু শাস্ত্রজ্ঞানবতাং সম্ভবতি : অনেনাধিক্যং ত্রিবিধা তত্ত্বশ্রদ্ধা : যজন্তে সাত্ত্বিকাদয়ো নিয়োগমুক্তভাবনপাস্তেষু : অতো ন শাস্ত্রাতিলঙ্ঘিনো গৃহ্যন্তে : অপি তু
ক্লেশবুদ্ধ্যা বা : আলস্যাদ্বা শাস্ত্রার্থজ্ঞানে যত্নমকৃত্বা কেবলমাচারপরম্পরাবশেন শ্রদ্ধাবশেন কেচিদ্দেবতারাধনাদৌ প্রবর্ত্তমানা গৃহ্যন্তে : অতোঽয়মর্থঃ : যে শাস্ত্রবিধিমুৎসৃজ্য দুঃখবুদ্ধ্যা আলস্যাদ্বা অনাদৃত্য কেবলমাচারপ্র
মাণেন শ্রদ্ধয়ান্বিতাঃ সন্তো যজন্তে : তেষাং কা নিষ্ঠা কা স্থিতি : কমাশ্রয়ঃ : তমেব বিশেষেণ পৃচ্ছতি : কিং সত্ত্বং আহো কিং রজঃ অথবা তম ইতি : তেষাং আহ শ্রীদেবপূজাদিপ্রবৃত্তিঃ : কিং সত্ত্বং সংশ্রিতা রজঃ তমঃ সংশ্রি
তা ইত্যর্থঃ : শ্রদ্ধায়াঃ সাত্ত্বিকত্বাৎ ক্লেশবুদ্ধ্যা আলস্যেন চ শাস্ত্রানাদরস্য রাজসতামসত্বাৎ এবমসংশয়ঃ : যদি সত্ত্বসংশ্রিতা তর্হি তেষামপি সাত্ত্বিকত্বাৎ যথোক্তাত্মজ্ঞানাধিকারঃ স্যাৎ : অন্যথা নেতি প্রশ্নতাৎপর্য্যার্থঃ

অত্রোত্তরং শ্রীভগবানুবাচ ॥ ত্রিবিধেতি : অয়মর্থঃ : শাস্ত্রতত্ত্বজ্ঞানতঃ প্রবর্ত্তমানানাং পঞ্চদশে যজ্ঞাবিত্ত্বা সাত্ত্বিকীপ্রকৃতিবিশেষশ্রদ্ধা ২ লোকাচারমাত্রেণ প্রবর্ত্তমানানাং শ্রদ্ধা সাত্ত্বিকী রাজসী তামসী চেতি ত্রিধা ভবতি :
অত্র হেতুমাহ : স্বভাবজা : স্বভাবঃ পূর্ব্বকর্ম্মসংস্কারঃ তস্মাজ্জাতা স্বভাবজা : স্বভাবমন্যথাকর্ত্তুং হি শাস্ত্রোক্তবিবেকজ্ঞানং সমর্থং তত্তু তেষাং নাস্তীতি অতঃ পূর্ব্বস্বভাবেন ভবতীতি : শ্রদ্ধা ত্রিবিধা ভবতি তামিমাং ত্রি
বিধাং শ্রদ্ধাং শৃণু তদ্বক্ষ্যমাণায়াং সাত্ত্বিকাদিভিঃ স্বেচ্ছেয়োদিনা ॥ ২ ॥ ননু শ্রদ্ধা সাত্ত্বিক্যেব সত্ত্বকার্য্যত্বেন : তেনৈব শ্রীভাগবতে উদ্ধবং প্রতি নির্দ্দিষ্টত্বাৎ : যথোক্তং : শমো দমস্তিতিক্ষা চ তপঃ সত্যং দয়া স্মৃতিঃ তু
ষ্টিস্ত্যাগোঽস্পৃহা শ্রদ্ধা হ্রীর্দয়াদিঃ স্বনির্বৃতিরিত্যেতাঃ সত্ত্বস্য বৃত্তয় ইতি : অতঃ কথং তস্যাস্ত্রৈবিধ্যমুচ্যতে : সত্যং তথাপি রজস্তমোমিশ্রত্বেন সত্ত্বস্য ত্রৈবিধ্যাৎ শ্রদ্ধায়াপি ত্রৈবিধ্যং ঘটত ইত্যাহ সত্ত্বেতি : সত্ত্বা

১৬ শ্রীভগবানুবাচ ॥ ত্রিবিধা ভবতি শ্রদ্ধা দেহিনাং সা স্বভাবজা ॥ ২ সাত্ত্বিকী রাজসী চৈব তামসী চেতি তাং শৃণু ॥ ২ ॥ সত্ত্বানুরূপা সর্ব্ব
শ্রী১৮ স্য শ্রদ্ধা ভবতি ভারত ॥ ২ শ্রদ্ধাময়োঽয়ং পুরুষো যো যচ্ছ্রদ্ধঃ স এব সঃ ॥ ৩ ॥ যজন্তে সাত্ত্বিকা দেবান্ যক্ষরক্ষাংসি রাজসাঃ ॥ ২
প্রেতান্ ভূতগণাংশ্চান্যে যজন্তে তামসা জনাঃ ॥ ৪ ॥ সাত্ত্বিকাদিপ্রকৃতীনাং তু দেবতানাং স্বচিহ্নিতঃ তদ্ভক্তানাং সাত্ত্বিকাদিত্বমবিতর্ক্যমিত্যর্থঃ ॥ ৪ ॥

সত্ত্বানুরূপা সত্ত্বান্তঃকরণং তদনুসারিণী সর্ব্বস্য বিবেকিনো লোকস্য শ্রদ্ধা ভবতি : তস্মাদয়ং লৌকিকঃ পুরুষঃ শ্রদ্ধাবিকারঃ ত্রিবিধয়া শ্রদ্ধয়া বিক্রিয়ত ইত্যর্থঃ : তদেবাহ : যো যচ্ছ্রদ্ধঃ যাদৃশী শ্রদ্ধা যস্য স এব সঃ তা
দৃশশ্রদ্ধাযুক্ত এব : পূর্ব্বং সাত্ত্বিককার্য্যেণ সাত্ত্বিকীশ্রদ্ধাযুক্তঃ পুরুষঃ সম্পন্নস্তৎসংস্কারেণ সাত্ত্বিকীশ্রদ্ধাযুক্ত এব ভবতি ২ যস্তু রজসঃ কার্য্যেণ রাজসশ্রদ্ধাযুক্তঃ সম্পন্নস্তাদৃশ এব ভবতি : যস্তু তমস
কার্য্যেণ তামসশ্রদ্ধাযুক্তঃ সম্পন্নস্তাদৃশ এব ভবতীতি : লোকাচারমাত্রেণ প্রবর্ত্তমানেষ্বেবং সাত্ত্বিকরাজসতামসশ্রদ্ধাব্যবস্থা : শাস্ত্রজনিতবিবেকজ্ঞানযুক্তানাং তু স্বভাববিজয়েন সাত্ত্বিক্যে
কৈব শ্রদ্ধেতি প্রকরণার্থঃ ॥ ৩ ॥ সাত্ত্বিকাদিভেদমেব কার্য্যভেদেন প্রপঞ্চয়তি : যজন্ত ইতি : সাত্ত্বিকা জনাঃ সত্ত্বপ্রকৃতীন্ দেবানেব যজন্তে পূজয়ন্তি : রাজসাস্তু যক্ষরক্ষাংসি রাজসপ্রকৃতীন্ যক্ষান্ রক্ষাংসি চ য
জন্তি : এতেভ্যোঽন্যে : বিনষ্টা তামসা জনাঃ প্রেতান্ ভূতগণাংশ্চ যজন্তে :

রজসতামসেষু পুনর্বিশেষান্তরমাহ : অশাস্ত্রেতি দ্বাভ্যাং : অশাস্ত্রমিতি : শাস্ত্রবিধিমজানন্তোঽপি কেচিৎ প্রাচীনপুণ্যসংস্কারেণ সাত্ত্বিকা ভবন্তি : কেচিন্মধ্যমা রাজসা ভবন্তি : কেচিদধমাস্তামসা ভবন্তি
: যে পুনরত্যন্তং মন্দভাগ্যাঃ পাষণ্ডসঙ্গেন তদাচারপরাস্তে পুনরশাস্ত্রবিহিতং ঘোরং ভূতভয়ঙ্করং তপস্তপ্যন্তে কুর্বন্তি : অত্র হেতুঃ : দম্ভাহঙ্কারাভ্যাং সংযুক্তাঃ তথা কামোঽভিলাষঃ রাগ
আসক্তিঃ বলমাগ্রহশ্চ এতৈরন্বিতাশ্চ সন্তঃ তানাসুরনিশ্চয়ান্ বিদ্ধি ইত্যুত্তরেণান্বয়ঃ ॥ ৫ ॥ কিঞ্চ কর্ষয়ন্ত ইতি : শরীরস্থং পঞ্চভূতসমূহং দেহস্থিতং : ভূতানাং পৃথিব্যাদীনাং গ্রামং সমূহং কর্ষয়ন্ত
ঃ উপবাসাদিভিঃ কৃশং কুর্বন্তঃ অচেতসোঽবিবেকিনঃ মাঞ্চ অন্তর্যামিতয়া দেহমধ্যে স্থিতং : মদাজ্ঞালঙ্ঘনেনৈব কর্ষয়ন্তো যে তপশ্চরন্তি তানাসুরনিশ্চয়ান্ আসুরো নিশ্চয়ো যেষাং তা

অশাস্ত্রবিহিতং ঘোরং তপ্যন্তে যে তপো জনাঃ । দম্ভাহঙ্কারসংযুক্তাঃ কামরাগবলান্বিতাঃ ॥ ৫ ॥ কর্ষয়ন্তঃ শরীরস্থং ভূতগ্রামমচেতসঃ । মাঞ্চৈবান্তঃশ
রীরস্থং তান্ বিদ্ধ্যাসুরনিশ্চয়ান্ ॥ ৬ ॥ আহারস্ত্বপি সর্বস্য ত্রিবিধো ভবতি প্রিয়ঃ । যজ্ঞস্তপস্তথা দানং তেষাং ভেদমিমং শৃণু ॥ ৭ ॥ আয়ুঃসত্ত্ববলারোগ্য
সুখপ্রীতিবিবর্দ্ধনাঃ । রস্যাঃ স্নিগ্ধাঃ স্থিরা হৃদ্যা আহারাঃ সাত্ত্বিকপ্রিয়াঃ ॥ ৮ ॥ কট্বম্ললবণাত্যুষ্ণতীক্ষ্ণরূক্ষবিদাহিনঃ । আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদাঃ ॥ দোঃ

বিদ্ধি ॥ ৬ ॥ আহারাদিভেদাদপি সাত্ত্বিকাদিভেদং দর্শয়িতুমাহ : আহারস্ত্বিত্যাদি ত্রয়োদশভিঃ : আহারস্ত্বিতি : সর্বস্য জনস্য য আহারো ওদনাদিঃ সোঽপি ত্রিবিধঃ প্রিয়ো ভবতি তথা যজ্ঞস্তপো দানানি ত্রিবিধানি ভব
ন্তি : তেষাং ভেদমিমং বক্ষ্যমাণং শৃণু : এতচ্চ রাজসতামসাহারযজ্ঞাদিপরিত্যাগেন সাত্ত্বিকাহারযজ্ঞাদিসেবয়া সত্ত্বশুদ্ধৌ যত্নঃ কর্তব্য ইত্যেতদর্থং কথ্যতে : ॥ ৭ ॥ তত্রাহারভেদমাহ : আয়ুরিতি ত্রিভিঃ : আয়ুর্জীবনং সত্ত্বমুৎসা
হঃ বলং শক্তিঃ আরোগ্যং রোগরাহিত্যং সুখং চিত্তপ্রসাদঃ প্রীতিরভিরুচিঃ : আয়ুরাদীনাং বিবর্দ্ধনাঃ : বিবৃদ্ধিকরাঃ : তে চ রস্যা রসবন্তঃ স্নিগ্ধাঃ স্নেহযুক্তাঃ স্থিরা রসাংশেন চিরকালাবস্থায়িনঃ হৃদ্যা হৃদয়ঙ্গমা দৃষ্টমাত্রে এবম্ভূ
তা আহারা ভক্ষ্যাঃ সাত্ত্বিকস্য প্রিয়াঃ ॥ ৮ ॥ তথা কট্বিতি : অতিশব্দঃ কট্বাদিষু সপ্তস্বপি সম্বধ্যতে : অতিকটুর্নিম্বাদিঃ অত্যম্লঃ অতিলবণঃ অত্যুষ্ণঃ প্রসিদ্ধঃ : অতিতীক্ষ্ণো মরীচাদিঃ অতিরূক্ষঃ : কঙ্গুকোদ্রবাদিঃ অতিবি
দাহী সর্ষপাদিঃ : অতিকট্বাদয়ঃ আহারা রাজসস্যেষ্টাঃ প্রিয়াঃ দুঃখং তাৎকালিকং হৃদয়সন্তাপাদি শোকঃ পশ্চাদ্ভাবি দৌর্মনস্যং : আময়ো রোগঃ এতান্ প্রযচ্ছন্তীতি তথা ॥ ৯ ॥

যাতযামমিতি : যাতো যামঃ প্রহরো যস্য পক্বস্যান্নাদেস্তদ্যাতযামং : শৈত্যাবস্থাং প্রাপ্তমিত্যর্থঃ : গতরসং নিষ্পীড়িতরসং পূতি দুর্গন্ধি : পর্যুষিতং দিনান্তরপক্বং উচ্ছিষ্টমন্যভুক্তাবশিষ্টমমেধ্যমভক্ষ্যং কলঞ্জাদিঃ এবম্ভূতং
ভোজনং তামসপ্রিয়ং ॥ ১০ ॥ যজ্ঞোপি ত্রিবিধস্তত্র সাত্ত্বিকমাহ : অফলাকাঙ্ক্ষিভিরিতি ত্রিভিঃ : অফলেতি : ফলাকাঙ্ক্ষারহিতৈঃ পুরুষৈঃ বিধিনা দৃষ্টঃ অবশ্যকর্তব্যতয়া বিহিতো যো যজ্ঞ ইজ্যতে : যষ্টব্যমে
সাত্ত্বিকো যজ্ঞঃ : কথমিজ্যতে : যষ্টব্যমেবেতি : যজ্ঞানুষ্ঠানমেব কার্যং নান্যৎ ফলং সাধনীয়মিত্যেবং মনঃ সমাধায় একাগ্রং কৃত্বা ইজ্যতে স ॥ ১১ ॥ রাজসযজ্ঞমাহ : অভিসন্ধায়েতি : ফলমভিসন্ধায় উদ্দিশ্য যদ্
ইজ্যতে : যজ্ঞঃ ক্রিয়তে : দম্ভার্থঞ্চ মহত্ত্বখ্যাপনার্থং যজ্ঞং রাজসং বিদ্ধি ॥ ১২ ॥ তামসযজ্ঞমাহ : বিধিহীনমিতি : শাস্ত্রোক্তবিধিহীনং : অসৃষ্টান্নং ব্রাহ্মণাদিভ্যো ন সৃষ্টমন্নং নিষ্পাদিতং যস্মিন্ তৎ : মন্ত্রহীনং যথোক্ত

যাতযামং গতরসং পূতি পর্যুষিতঞ্চ যৎ । উচ্ছিষ্টমপি চামেধ্যং ভোজনং তামসপ্রিয়ং ১০ ॥ অফলাকাঙ্ক্ষিভির্যজ্ঞো বিধিদৃষ্টো য ইজ্যতে । যষ্টব্যমেবেতি মনঃ সমাধা-

৩৬ শ্রী ১৭ য় স সাত্ত্বিকঃ ॥ ১১ ॥ অভিসন্ধায় তু ফলং দম্ভার্থমপি চৈব যৎ । ইজ্যতে ভরতশ্রেষ্ঠ তং যজ্ঞং বিদ্ধি রাজসং ॥ ১২ ॥ বিধিহীনমসৃষ্টান্নং মন্ত্রহীনমদক্ষিণং । শ্রদ্ধাবিরহি-

তং যজ্ঞং তামসং পরিচক্ষতে ॥ ১৩ ॥ দেবদ্বিজগুরুপ্রাজ্ঞপূজনং শৌচমার্জবং । ব্রহ্মচর্যমহিংসা চ শারীরং তপ উচ্যতে ॥ ১৪ ॥ অনুদ্বেগকরং বাক্যং সত্যং প্রিয়হিতঞ্চ যৎ । স্বাধ্যা-

য়াভ্যসনঞ্চৈব বাঙ্ময়ং তপ উচ্যতে ॥ ১৫ ॥ মনঃপ্রসাদঃ সৌম্যত্বং মৌনমাত্মবিনিগ্রহঃ । ভাবসংশুদ্ধিরিত্যেতত্তপো মানসমুচ্যতে ॥ ১৬ ॥

দক্ষিণারহিতং শ্রদ্ধাশূন্যঞ্চ যজ্ঞং তামসং পরিচক্ষতে : কথয়ন্তি শিষ্টাঃ ॥ ১৩ ॥ তপসঃ সাত্ত্বিকাদিভেদং দর্শয়িতুং প্রথমং তাবৎ শারীরাদিভেদেন ত্রৈবিধ্যমাহ : দেবেতি ত্রিভিঃ : দেবাদীনাং পূজনং দেবব্রাহ্মণ
গুর্বাদিপূজনং শৌচাদিকঞ্চ শারীরং তপ উচ্যতে ॥ ১৪ ॥ বাচিকং তপ আহ : অনুদ্বেগেতি : উদ্বেগং ভয়ং ন করোতি অনুদ্বেগকরং বাক্যং সত্যঞ্চ শ্রোতুঃ প্রিয়ং হিতঞ্চ পরিণামসুখকরং : স্বাধ্যায়াভ্যসনং : বেদ
াভ্যাসশ্চ বাচা নির্বর্ত্যং তপ উচ্যতে ॥ ১৫ ॥ মানসং তপ আহ : মন ইতি : মনঃপ্রসাদঃ স্বচ্ছতা : সৌম্যত্বমক্রূরতা : মৌনং মুনের্ভাবঃ মননমিত্যর্থঃ : আত্মনো মনসো বিনিগ্রহঃ : বিষয়েভ্যঃ প্রত্যা
হারঃ : ভাবসংশুদ্ধির্ব্যবহারে মায়ারাহিত্যং এতন্মানসং তপঃ ॥ ১৬ ॥

তদেবং শরীরবাঙ্মনোভির্নির্বর্ত্যং ত্রিবিধং তপোদর্শিতং তস্য ত্রিবিধস্য তপসঃ সাত্ত্বিকাদিভেদেন ত্রৈবিধ্যমাহ শ্রদ্ধয়েতি ত্রিভিঃ তত্ত্রিবিধং সম্যক্ তপঃ পরয়া শ্রদ্ধয়া: ফলাকাঙ্ক্ষারহিতৈরেকাগ্রচিত্তৈঃ
নরৈর্যত্তপস্তপ্তং সাত্ত্বিকং ॥ ১৭ ॥ রাজসমাহ: সৎকারমানেতি: সৎকারঃ সাধুকারঃ সাধুরয়ং তপস্বী ব্রাহ্মণ ইত্যাদিবাক্পূজা: মানঃ প্রত্যুত্থানাভিবাদনাদিদৈহিকী পূজা: পূজা ধনাদিলাভঃ তদ
র্থং দম্ভেন যত্তপঃ ক্রিয়তে: অতএব চলমনিয়তং অধ্রুবং ক্ষণিকং যদেবম্ভূতং তপস্তদিহ রাজসং প্রোক্তং ॥ ১৮ ॥ তামসং তপ আহ: মূঢ়েতি মূঢ়গ্রাহেণ অবিবেককৃতদুরাগ্রহেণ আত্মনঃ পীড়য়া যত্তপঃ ক্রিয়তে
পরস্যোচ্ছাদনার্থং বা: অন্যস্য বিনাশার্থমভিচাররূপং তত্তামসমুদাহৃতং ॥ ১৯ ॥ ইদানীং দানস্য ত্রৈবিধ্যমাহ: দাতব্যমেবেতি শাস্ত্রৈর্নিশ্চয়েন যদ্দানং দীয়তে: অনুপকারিণে

শ্রদ্ধয়াপরয়াতপ্তংতপস্তত্ত্রিবিধংনরৈঃ ২ অফলাকাঙ্ক্ষিভির্যুক্তৈঃসাত্ত্বি কংপরিচক্ষতে ॥ ১৭ ॥ সৎকারমানপূজার্থংতপোদম্ভেনচৈবযৎ ২
ক্রিয়তেতদিহপ্রোক্তংরাজসংচলমধ্রুবং ॥ ১৮ ॥ মূঢ়গ্রাহেণাত্মনোযৎপীড় য়াক্রিয়তেতপঃ ২ পরস্যোৎসাদনার্থংবাতত্তামসমুদাহৃতং ॥ ১৯ ॥
দাতব্যমিতিযদ্দানংদীয়তেঽনুপকারিণে ২ দেশেকালেচপাত্রেচতদ্দানং সাত্ত্বিকংস্মৃতং ॥ ২০ ॥ যত্তুপ্রত্যুপকারার্থংফলমুদ্দিশ্যবাপুনঃ ২
দীয়তেচপরিক্লিষ্টংতদ্দানংরাজসংস্মৃতং ॥ ২১ ॥ অদেশকালেযদ্দানমপা ত্রেভ্যশ্চদীয়তে ২ অসৎকৃতমবজ্ঞাতংতত্তামসমুদাহৃতং ॥ ২২ ॥

প্রত্যুপকাররহিতায়: দেশে কুরুক্ষেত্রাদৌ কালে গ্রহণাদৌ: পাত্রে চেতি তদ্দেশকালসাহচর্যাৎ সপ্তমী প্রযুক্তা: পাত্রভূতায় তপঃশ্রুতাদিসম্পন্নায় ব্রাহ্মণায়েত্যর্থঃ: যদ্বা চ ত্বর্থ ইতি চেৎ: পাত্রে ব্রহ্মকায়ে
ত্যর্থঃ: সতি সর্বস্মাদাপদ্গণাদ্দাতারং পাতীতি পাত্রং তদেবম্ভূতং দানং সাত্ত্বিকং ॥ ২০ ॥ রাজসদানমাহ: যদিতি: কালান্তরে মাং প্রত্যুপকারং করিষ্যতীতি: এবমর্থং ফলং স্বর্গাদিকমুদ্দিশ্য যৎ পুন
দীয়তে: পরিক্লিষ্টং চিত্তক্লেশযুক্তং যথা ভবত্যেবং তদ্দানং রাজসমুদাহৃতং কথিতং ॥ ২১ ॥ তামসদানমাহ: অদেশেতি: অশুচিস্থানে অকালে অশৌচাদিসময়ে: অপাত্রেভ্যো বিটনটাদিভ্যো যদ্দানং দীয়তে
দেশকালপাত্রসম্পত্তাবপি: অসৎকৃতং পাদপ্রক্ষালনাদিসৎকাররহিতং অবজ্ঞাতং তিরস্কারযুক্তং এবম্ভূতং দানং তামসমুদাহৃতং কথিতং ॥ ২২ ॥ ওঁনমঃশ্রীরামায় নমোহরায় ॥

নন্বেবংবিচার্য্যমাণেসর্ব্বমপিতপোদানাদিকংরাজসতামসপ্রায়মেবেতিকথংতর্হিযজ্ঞাদিপ্রয়াসস্যাশঙ্ক্যতথাবিধস্যাপি : সাত্ত্বিকতাপাদনপ্রকারংদর্শয়িতুমাহ ওঁতৎসদিত্যেবংত্রিবিধোব্রহ্মণঃপরমাত্মনোনির্দ্দেশোনামব্যপদেশঃস্মৃতঃশিষ্টৈঃ : তত্রতাবদোমিতি : ব্রহ্মেত্যাদিশ্রুতিপ্রসিদ্ধেঃ ওমিতিব্রহ্মণোনাম : জগৎকারণত্বেনাতিপ্রসিদ্ধত্বাদবিদুষাংপরোক্ষত্বাচ্চ তচ্ছব্দোপিব্রহ্মণোনাম : পরমার্থসত্ত্বাৎ প্রশস্তত্বাদিভিঃ : সচ্ছব্দোপিব্রহ্মণোনাম : অয়ংত্রিবিধোনামনির্দ্দেশো বিগুণমপিসগুণংকর্ত্তুংসমর্থইত্যাশয়েনস্তৌতি : তেনত্রিবিধেনব্রহ্মণোনামনির্দ্দেশেন ব্রাহ্মণাবেদাশ্চযজ্ঞাশ্চপুরাসৃষ্ট্যাদৌবিহিতা নির্ম্মিতাঃ : সৃষ্টাইত্যর্থোবা : যদ্বাযস্যায়ংত্রিবিধোব্রহ্মণোনির্দ্দেশঃ : তেনপরমাত্মনাব্রাহ্মণাদয়ঃপবিত্রিতাঃসৃষ্টাঃ তস্মাদয়ংনির্দ্দেশোঽতিপ্রশস্তইত্যর্থঃ ॥ ২৩ ॥ ইদানীংপ্রত্যেকমোঙ্কারাদীনাং

১৭

ওঁতৎসদিতিনির্দ্দেশোব্রহ্মণস্ত্রিবিধঃস্মৃতঃ। ব্রাহ্মণাস্তেনবেদাশ্চযজ্ঞাশ্চবিহিতাঃপুরা ॥ ২৩ ॥ তস্মাদোমিত্যুদাহৃত্যযজ্ঞদানতপঃক্রিয়াঃ

শ্রী১০ প্রবর্ত্তন্তেবিধানোক্তাঃসততংব্রহ্মবাদিনাং ॥ ২৪ ॥ তদিত্যনভিসন্ধায়ফলংযজ্ঞতপঃক্রিয়াঃ। দানক্রিয়াশ্চবিবিধাঃক্রিয়ন্তেমোক্ষকা

ঙ্ক্ষিভিঃ ॥ ২৫ ॥ সদ্ভাবেসাধুভাবেচসদিত্যেতৎপ্রযুজ্যতে। প্রশস্তেকর্ম্মণিতথাসচ্ছব্দঃপার্থযুজ্যতে ॥ ২৬ ॥

প্রাশস্ত্যমাহ তস্মাদিতি : যস্মাদেবংব্রহ্মণোনির্দ্দেশঃপ্রশস্তঃ তস্মাদোমিত্যুদাহৃত্যোচ্চার্য্যকৃতাবেদবাদিনাংযজ্ঞাদিশাস্ত্রোক্তাঃক্রিয়াঃসততংসর্ব্বদাঅঙ্গবৈগুণ্যেপিপ্রকর্ষেণবর্ত্তন্তে : সগুণাভবন্তীত্যর্থঃ ॥ ২৪ ॥ দ্বিতীয়ংনামস্তৌতি : তদিতি তদিত্যুদাহৃত্যেতিপূর্ব্বস্যানুষঙ্গঃ তদিত্যুদাহৃত্যশুদ্ধচিত্তৈর্মোক্ষকাঙ্ক্ষিভিস্তৎপক্ষকৈঃ ফলানভিসন্ধায় যজ্ঞাদ্যাঃক্রিয়াঃক্রিয়ন্তে : অতঃ চিত্তশোধনদ্বারা ফলসঙ্কল্পাভাবেনমোক্ষসম্পাদকত্বাৎতচ্ছব্দনির্দ্দেশঃপ্রশস্তইত্যর্থঃ ॥ ২৫ ॥ সচ্ছব্দস্যপ্রাশস্ত্যমাহ : সদ্ভাবইতিদ্বাভ্যাং : সদ্ভাবেঅস্তিত্বেদেবদত্তস্যপুত্রাদিকমস্তিইত্যস্মিন্নর্থে সাধুভাবেচ : দেবদত্তস্যপুত্রাদিঃশ্রেষ্ঠইত্যস্মিন্নর্থেঽপিসদিত্যেতৎপদংপ্রযুজ্যতে : প্রশস্তেমাঙ্গলিকেবিবাহাদৌকর্ম্মণিচসদিদংকর্ম্মইতিসচ্ছব্দোযুজ্যতে : সঙ্কীর্ত্ত্যতইতিবা ॥ ২৬ ॥

কিঞ্চ : যজ্ঞইতি : যজ্ঞাদিষুযাস্থিতিস্তাৎপর্য্যেণাবস্থানং তদপিসদিত্যুচ্যতে : যস্যেদংনামত্রয়ং পরমেশ্বরস্যার্থঃ ফলংযস্যতত্তদর্থং কর্ম্ম পূজোপহারগৃহাঙ্গনপরিমার্জ্জনোপলেপরঙ্গমালিকাদিক্রিয়তে তৎসিদ্ধয়ে যদন্যৎ
কর্ম্মক্রিয়তে উদ্যানশালানির্ম্মাণবনার্জ্জনাদি বিষয়ং তত্তৎকর্ম্মতদর্থীয়ং তচ্চাতিতে বহিত্তমপিসদিত্যেবাভিধীয়তে : যস্মাদতিপ্রশস্তং নামত্রয়ং তস্মাদেতৎ সর্ব্বকর্ম্মসম্পূর্ত্ত্যর্থং কীর্ত্তয়েদিতিতাৎপর্য্যার্থঃ ।
শ্রদ্ধাচার্য্যবাদাত্রপাপধ্যাবিধিমুক্তকল্পতে : বিধেয়ং সূয়তে বক্ষ্যতি যায়াং : অপাস্তেপ্রবর্ত্তন্তে বিধানোক্তাঃ ক্রিয়াঃ সততং মোক্ষকাঙ্ক্ষিভিঃ ইত্যাদি বর্ত্তমানোপদেশশ্চ : সমিধোযজতীত্যাদি বর্ত্তমানোপদেশবদ্বি-
ধিত্বাপরিণমনীয়স্তাত্রাঃস্ত । প্রসজ্জারেসাধুভাবেচেত্যাদিষু প্রশস্তার্থন্নানসন্ধীচ্ছতইতি । প্রার্থিতজন্মমন বিধিকল্পনেরাত্মসী ॥ ২৭ ॥ ইদানীং সর্ব্বকর্ম্মসু শ্রদ্ধৈবাপেক্ষিতা প্রশস্ত্যর্থমশ্রদ্ধয়া
হুতং সর্ব্বমনিন্দতি : অশ্রদ্ধয়েতি : অশ্রদ্ধয়াহুতং হবনং দত্তং দানং তপ্তং নির্ব্বর্ত্তিতং তপ যচ্চান্যদপিকৃতং তৎ সর্ব্বমসদিত্যুচ্যতে । যতস্তৎপ্রেত্যনো কান্তাপন ফলতি : বিগুণত্বাৎ : নোঽহং অস্মিল্লোকেনফ-

লতে অসিদ্ধানেচস্থিতিঃ সদিতিচোচ্যতে । কর্ম্মচৈবতদর্থীয়ং সদিত্যেবাভিধীয়তে ॥ ২৭ ॥ অশ্রদ্ধয়াহুতং দত্তং তপস্তপ্তং কৃতঞ্চ যৎ । অসদিত্যুচ্যতে পার্থ নচ তৎপ্রেত্য নো
ইহ ॥ ২৮ ॥ ইতিশ্রীভগবদ্গীতাসূপনিষৎসু শ্রদ্ধাভেদোনামসপ্তদশোধ্যায়ঃ ॥ ❋ ॥ অর্জ্জুন উবাচ ॥ সংন্যাসস্য মহাবাহো তত্ত্বমিচ্ছামি বেদিতুং : ত্যাগস্য চ হৃষীকেশ পৃথক্ কেশিনিসূদন ॥ ১ ॥

নতি : অথসঙ্কর্ষহত্রাঃ ॥ ❋ ॥ হন্ততামোময়ীংহিত্বা শ্রদ্ধাং সত্ত্বময়ীং শ্রিতঃ । তত্ত্বজ্ঞানাধিকারীস্যাদিতিসপ্তদশেস্থিতং ॥ ন্যাসযোগবিভাগেনসর্ব্বগীতার্থসংগ্রহং । স্পষ্টমষ্টাদশেপ্রাহপরমার্থ
বিনিশ্চয়ে ॥ অত্রসর্ব্বকর্ম্মাণিমনসাসংন্যস্যাস্তেসুখং বশী সংন্যাসযোগযুক্তাত্মাবিমুক্তো মামুপৈষ্যসি ইত্যাদিনাকর্ম্মসন্ন্যাস উপদিষ্টঃ তথা ত্যক্ত্বাকর্ম্মফলাসঙ্গং নিত্যতৃপ্তোনিরাশ্রয়ঃ । সর্ব্বকর্ম্মফল
ত্যাগং ততঃ কুরু যতাত্মবানিত্যাদিষু চ : ফলমাত্রত্যাগেনকর্ম্মানুষ্ঠানমুক্তং : নচপরস্পরবিরুদ্ধং সর্ব্বজ্ঞঃ কারুণিকো ভগবানুপদিশেত : অতঃ কর্ম্মসংন্যাসস্য তদনুষ্ঠানস্য চাবিরোধপ্রকারং বুভুৎসুরর্জ্জুন
উবাচ : সংন্যাসস্যমহাবাহোইতি : হে হৃষীকেশ সর্ব্বেন্দ্রিয়নিয়ামক : হেকেশিনিসূদন কেশিনাম্নোহয়াকৃতের্দৈত্যস্য মুখে স্বহস্তং দত্ত্বা যথাযথং স্বমিচ্ছতাহ্যান্তং ত্বাতিস্মাত্মখে বামবাহুং প্রবেশ্যতং
ক্ষণামেরবিদ্ধং কেনাতেনেরবাহুনা কর্কটিকাফলবত্ত্বং বিদার্য্য নিসূদিতবান্ : অতএব মহাবাহো ইতি সম্বোধনং : সংন্যাসস্যত্যাগস্যচ তত্ত্বং পৃথক্ বিবেকেন বেদিতুং জ্ঞাতুমিচ্ছামি ॥ ~~~১~~~ ॥

অথোত্তরং শ্রীভগবানুবাচ : কাম্যানামিতি : পুত্রকামো যজেত স্বর্গকামো যজেতেত্যেবমাদিকামোপবন্ধেন বিহিতানাং কর্ম্মণাং ন্যাসং পরিত্যাগং সংন্যাসং কবয়ো বিদুঃ : সম্যক্ফলৈঃ সহ কর্ম্মণামপি ন্যাসং সংন্যাসং কবয়ো বিদুঃ : পণ্ডিতা
জানন্তীত্যর্থঃ : সর্ব্বেষাং কাম্যানাং নিত্যনৈমিত্তিকানাঞ্চ কর্ম্মণাং ফলত্যাগমাত্রং প্রাহুঃ ত্যাগং বিচক্ষণা নিপুণাঃ : নতু স্বরূপতঃ কর্ম্মত্যাগং : নন্ু : নিত্যনৈমিত্তিকানাঞ্চ কর্ম্মণাং ফলাশ্রবণাদবিদ্যমানস্য ত্যাগঃ
কথং স্যাৎ : নহি বন্ধ্যায়াঃ পুত্রত্যাগঃ সম্ভবতি উচ্যতে : যদ্যপি স্বর্গকামঃ পশুকাম ইত্যাদিবৎ সন্ধ্যামুপাসীত : যাবজ্জীবমগ্নিহোত্রং জুহোতীত্যাদিষু ফলবিশেষো ন শ্রূয়তে : তথাপ্যপ্রবৃত্ত স্বার্থে ব্যাপারে প্রেক্ষাবন্তং প্র
বর্ত্তয়িতুমশক্নুবন্ বিধির্বিশ্বজিতা যজেতেত্যেবমাদিষ্বিব কিমপি সামান্যতঃ ফলমাক্ষিপত্যেব : নচাতীব্রশ্রদ্ধয়া স্বসিদ্ধিফলে রহিতে বিধেঃ প্রয়োজনং মন্তব্যং : প্রত্যবায়প্রহৃত্যেব পাপক্ষয়ঃ দুঃখপরিহারঃ
শ্রূয়তে নিত্যাদিষু ফলং : সর্ব্বত্র অত্যাগিনাং ভবন্তীতি : কর্ম্মণা পিতৃলোক ইতি : ধর্ম্মেণ পাপমপনুদতীত্যাদিষু : তস্মাদ্যুক্তমুক্তং : সর্ব্বকর্ম্মফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণা ইতি : নন্বত্র ফলত্যাগেপি নৈষ্ক

শ্রী ৭১ ভগবানুবাচ ॥ কাম্যানাং কর্ম্মণাং ন্যাসং সংন্যাসং কবয়ো বিদুঃ ॥ ১ সর্ব্বকর্ম্মফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণাঃ ॥ ॥ ২ ॥

নৈষ্কর্ম্মসিদ্ধিরিতি চেৎ নৈবং স্যাৎ : তত্র : সর্ব্বেষাং কর্ম্মণাং সংযোগপৃথক্ত্বেন বিবিদিষার্থতয়া বিনিয়োগাৎ : তথাচ শ্রুতিঃ : তমেতমাত্মানং বেদানুবচনেন ব্রাহ্মণা বিবিদিষন্তি : যজ্ঞেন দানেন তপসানাশকেনেতি
অতঃ শ্রুতিপদোক্তং সর্ব্বোক্তং ফলং বন্ধকত্বেন ত্যক্ত্বা বিবিদিষার্থং সর্ব্বকর্ম্মানুষ্ঠানং ঘটতএব : বিবিদিষা চ নিত্যানিত্যবস্তুবিবেকেন নিবৃত্তদেহাদ্যভিমানতয়া বুদ্ধেঃ প্রত্যক্প্রবণতা : তাং পর্য্যন্তঞ্চ সত্ত্বশুদ্ধ্যর্থং জ্ঞানাবিরু
দ্ধং যথোচিতমাবশ্যকং কর্ম্ম কর্ত্তব্যং তৎফলত্যাগশ্চ কর্ম্মযোগো নাম : নতু স্বরূপেণ : তথাচ শ্রুতিঃ : কুর্ব্বন্নেবেহ কর্ম্মাণি জিজীবিষেচ্ছতং সমা ইতি : ততঃ পরন্তু সর্ব্বকর্ম্মনিবৃত্তিঃ স্বতএব ভবতি তদুক্তং নৈষ্কর্ম্যসিদ্ধৌ
প্রত্যক্প্রবণতাং বুদ্ধেঃ কর্ম্মাণ্যুৎপাদ্য শুদ্ধিতঃ : কৃতার্থান্যস্তমায়ান্তি প্রাবৃডন্তে ঘনা ইব : উক্তঞ্চ ভগবতা : যস্ত্বাত্মরতিরেব স্যাদিত্যাদি : বশিষ্ঠেনোক্তং : ন কর্ম্মাণি ত্যজেদ্যোগী কর্ম্মভিস্ত্যজ্যতে হ্যসাবিতি জ্ঞান
নিষ্ঠাবিক্ষেপকত্বেন ত্যাগেপি ত্যজেদ্বা : তদুক্তং ভাগবতে : তাবৎ কর্ম্মাণি কুর্ব্বীত ন নির্বিদ্যেত যাবতা : মৎকথাশ্রবণাদৌ বা শ্রদ্ধা যাবন্ন জায়তে ॥ জ্ঞাননিষ্ঠো বিরক্তো বা মদ্ভক্তো বানপেক্ষকঃ : সলিঙ্গানাশ্রমাংস্ত্যক্ত্বা চরেদ
বিধিগোচর ইত্যাদি : অনয়োশ্চ প্রসঙ্গেন প্রস্তুতমত্র সংক্ষেপঃ ॥ ২ ॥ একস্যোভয়রূপত্বে সংযোগপৃথক্ত্বং : সংযোগঃ সম্বন্ধঃ তস্য পৃথক্ত্বং নানাত্বং তেন ৩ ॥ বিবিদিষায়াঃ ফলেন সহাপদেশো নামীমাংসকস্তু
যোগাদিভিভাব্যঃ ॥ ৩ ॥

দ্বাদশাদিকর্ম্মব

অবিদুষঃ ফলত্যাগমাত্রমেব ত্যাগশব্দার্থো ন কর্ম্মত্যাগ ইতি ॥ এতদেব মতান্তরনিরাসেন স্ফুটীকর্তুং মতভেদং দর্শয়তি ত্যাজ্যমিতি ॥ দোষবৎ হিংসাদিদোষবত্ত্বেন বন্ধকমিতি হেতোঃ সর্ব্বমপি কর্ম্ম ত্যাজ্যমিত্যেকে সাংখ্যাঃ প্রাহুর্ম্মনীষিণঃ ইতি ॥ অয়ম্ভাবঃ ॥ ন হিংস্যাৎ সর্ব্বাণি ভূতানীতি নিষেধঃ পুরুষস্যানর্থহেতুর্হিংসেত্যাহ ॥ অগ্নীষোমীয়ং পশুমালভেতেত্যাদিবিধিস্তু হিংসায়াঃ ক্রতূপকারকত্বমাহ ॥ অতো ভিন্নবিষয়ত্বেন সামান্যবিশেষন্যায়াগোচরত্বাদ্বিধ্যঙ্গস্যাপি কর্ম্মণো হিংসাদেঃ সত্ত্বাৎ সর্ব্বমপি কর্ম্ম ত্যাজ্যমেবেতি ॥ তদুক্তং দৃষ্টবদানুশ্রবিকঃ স হ্যবিশুদ্ধিক্ষয়াতিশয়যুক্ত ইতি ॥ অনুশ্রবো বেদঃ ॥ অনুশ্রবেণ নিষ্পাদিতঃ আনুশ্রবিকঃ কর্ম্মকলাপঃ ॥ স চাবিশুদ্ধিক্ষয়াতিশয়যুক্ত ইতি ॥ অপরে মীমাংসকা যজ্ঞাদিকং কর্ম্ম ন ত্যাজ্যমিত্যাহুঃ ॥ অয়ম্ভাবঃ ক্রত্বর্থাপি সতী হিংসা পুরুষেণ কর্তব্যা ॥ সা চান্যোদ্দেশেনাপি কৃতা পুরুষস্য প্রত্যবা

ত্যাজ্যং দোষবদিত্যেকে কর্ম্ম প্রাহুর্ম্মনীষিণঃ ॥ ২ যজ্ঞ ॥ দানতপঃকর্ম্ম ন ত্যাজ্যমিতি চাপরে ॥ ৩ ॥

নিশ্চয়ং শৃণু মে তত্র ত্যাগে ভরতসত্তম ॥ ২ ত্যাগো ॥ হি পুরুষব্যাঘ্র ত্রিবিধঃ সম্প্রকীর্ত্তিতঃ ॥ ৪ ॥

যজ্ঞদানতপঃকর্ম্ম ন ত্যাজ্যং কার্য্যমেব তৎ ॥ ২ যজ্ঞো ॥ দানং তপশ্চৈব পাবনানি মনীষিণাং ॥ ৫ ॥

যদ্যপ্যেবং তথাপি ॥ বিধির্বিধেয়স্য তদুদ্দেশেনানুষ্ঠেয়ত্বে তদর্থং নঞর্থাদ্যাবশেষস্য ॥ নত্বেবং নিষেধো নিষেধ্যস্য তদর্থমপেক্ষাতে ॥ প্রাপ্তিমাত্রাপেক্ষকত্বাৎ ॥ অন্যথা অজ্ঞানপ্রমাদাদিকৃতদোষাভাবপ্রসঙ্গাৎ তদেবং সমানবিষয়ত্বেন সামান্যশাস্ত্রস্য বিশেষেণ বাধা ॥ নাস্তি দোষবত্ত্বমতো নিত্যং যজ্ঞাদিকং কর্ম্ম ন ত্যাজ্যমিতি ॥ ৩ ॥ এবং মতভেদমুপন্যস্য স্বমতং কথয়িতুমাহ ॥ নিশ্চয়ং শৃণ্বিতি ॥ তত্রৈবং বিপ্রতিপন্নে ত্যাগে নিশ্চয়ং মে বচঃ শৃণু ॥ ত্যাগস্য লোকপ্রসিদ্ধত্বাৎ ॥ কিমত্র শ্রোতব্যমিতি মা সংস্থা যতো ত্যাগ ইতি ॥ হে ভরতসত্তম ॥ পুরুষশ্রেষ্ঠ ॥ ত্যাগো হি দুর্ব্বোধঃ ॥ ত্রিবিধস্তস্মাদয়ং কর্ম্মত্যাগস্তত্র বিভক্তস্তামসাদিভেদেন ত্রিবিধঃ ॥ সম্যগ্বিবেকেন প্রতিপাদিতঃ প্রবিবিক্তঃ ॥ নিয়তস্য তু সংন্যাস ইত্যাদিনা বক্ষ্যতি ॥ ৪ ॥ প্রথমং তাবন্নিশ্চয়মাহ যজ্ঞ ইতি ॥ বিবেকিনাং পাবনানি চিত্তশুদ্ধিকরাণি ॥ ৫ ॥

যেনপ্রকারেণকৃতান্যেতানিপাবনানিভবন্তিতংপ্রকারংদর্শয়ন্নাহ এতানীতি : যানিযজ্ঞাদীনিকর্ম্মাণিময়াপাবনানীত্যুক্তা এতান্যপিসর্ব্বাণিকর্ত্তব্যানি : কথংসঙ্গংত্যক্ত্বাফলানিচত্যক্ত্বাকেবলমীশ্বরারাধনতয়াকর্ত্তব্যা
নি : ফলানিচত্যক্ত্বাকর্ত্তব্যানীতিমেনিশ্চিতংমতম্ অতএবোত্তমং ॥ ৬ ॥ প্রতিজ্ঞাতংত্যাগস্যত্রৈবিধ্যমিদানীন্দর্শয়তি : নিয়তস্যেতিত্রিভিঃ : কাম্যকর্ম্মণাংবন্ধকত্বাৎসন্ন্যাসোযুক্তঃ : নিয়তস্যতুনিত্য
স্যপুনঃকর্ম্মণঃসন্ন্যাসস্ত্যাগোনোপপদ্যতে : সত্ত্বশুদ্ধিদ্বারামোক্ষহেতুত্বাৎ : অতস্তস্যপরিত্যাগউপাদেয়ত্বেপিত্যাজ্যমিত্যেবংলক্ষণাৎ : মোহাদ্ভবেৎ : সচমোহস্যতামসত্বাত্তামসঃ পরিকী
র্ত্তিতঃ ॥ ৭ ॥ রাজসত্যাগমাহ : দুঃখমিতি : আত্মবোধংবিনাকেবলংদুঃখমিত্যেবংমত্বাশরীরায়াসভয়ান্নিত্যংকর্ম্মত্যজেদিতি যত্তাদৃশস্ত্যাগোরাজসঃদুঃখস্যরাজসত্বাৎ : অতস্তংরাজ

এতান্যপিতুকর্ম্মাণিসঙ্গংত্যক্ত্বাফলানিচ ২ কর্ত্তব্যানীতিমেপার্থনিশ্চিতং মতমুত্তমং ॥ ৬ ॥ নিয়তস্যতুসন্ন্যাসঃকর্ম্মণোনোপপদ্যতে ২
হীঃ ১২ মোহাত্তস্যপরিত্যাগস্তামসঃপরিকীর্ত্তিতঃ ॥ ৭ ॥ দুঃখমিত্যেব যৎকর্ম্মকায়ক্লেশভয়াত্ত্যজেৎ ২ সকৃত্বারাজসংত্যাগংনৈবত্যাগফলংলভে
ৎ ॥ ৮ ॥ কার্য্যমিত্যেবযৎকর্ম্মনিয়তংক্রিয়তেঽর্জ্জুন ২ সঙ্গংত্যক্ত্বাফলঞ্চৈবসত্যাগঃসাত্ত্বিকোমতঃ ॥ ৯ ॥
নদ্বেষ্ট্যকুশলংকর্ম্মকুশলেনানুষজ্জতে ২ ত্যাগী সত্ত্বসমাবিষ্টোমেধাবীছিন্নসংশয়ঃ ॥ ১০ ॥

সংত্যাগংকৃত্বারাজসস্তুপুরুষঃ ত্যাগফলংজ্ঞাননিষ্ঠালক্ষণংনৈবলভতইত্যর্থঃ ॥ ৮ ॥ সাত্ত্বিকংত্যাগমাহ : কার্য্যমিতি : কার্য্যমিত্যেববুদ্ধ্বানিয়তংঅবশ্যকতয়াবিহিতংকর্ম্মসঙ্গংফলংত্যক্ত্বাক্রিয়তইতিযঃসত্যাদৃশ
স্ত্যাগঃসাত্ত্বিকোমতঃ ॥ ৯ ॥ এবম্ভূতসাত্ত্বিকত্যাগপরিনিষ্ঠিতস্যলক্ষণমাহ : নদ্বেষ্টীতি : সত্ত্বসমাবিষ্টঃসত্ত্বেনব্যাপ্তঃসাত্ত্বিকত্যাগী অকুশলংদুঃখাবহং : শিশিরেপ্রাতঃস্নানাদিকংকর্ম্মনদ্বেষ্টি :
কুশলেনচ সুখকারককর্ম্মণিনিদাঘেমধ্যাহ্নস্নানাদৌনানুষজ্জতে প্রীতিংনকরোতি : অত্রহেতুঃ মেধাবীস্থিরবুদ্ধিঃ যতঃপণ্ডিতোযাদৃশদপিদুঃখংসহতে ২ স্বর্গাদিসুখমপিত্যজতে : অতঃকিয়দে
তত্তাৎকালিকংসুখংদুঃখঞ্চেত্যেবমত্রসন্ধানবানিত্যর্থঃ ২ অতএবছিন্নঃসংশয়োমিথ্যাজ্ঞানংদৈহিকস্যসুখদুঃখয়োঃস্বপাদিসোপহিতজীর্বানঞ্চস্যযস্যসঃ ॥ ১০ ॥

নান্নরঙ্কৃতাৎকর্ম্মফলত্যাগাদ্বিসংকর্ম্মযোগঃ তথাচসতি কর্ম্মবিক্ষেপাভাবেনজ্ঞাননিষ্ঠা ব্রহ্ম সম্পদ্যতে অত্রাহ নহীতি : দেহভৃতা দেহাভিমানিনা নিঃশেষেন সর্ব্বানিকর্ম্মানিত্যক্তুং নহিশক্যং : তস্মাত্ : নহিক
শ্চিৎক্ষণমপীত্যাদি নতস্মাদ্যস্তুকর্ম্মানিকুর্ব্বন্নেবকর্ম্মফলত্যাগী সএব মুখ্যস্ত্যাগীত্যভিধীয়তে ॥ ১১ ॥ এবম্ভূতস্য কর্ম্মফলত্যাগস্য ফলমাহ : অনিষ্টমিতি অনিষ্টং নারকিত্বং : ইষ্টংদেব
ত্বংমিশ্রংমনুষ্যত্বং : এবংত্রিবিধংপাপস্যপুণ্যস্যচউভয়মিশ্রস্যকর্ম্মণোযৎফলংপ্রসিদ্ধং তৎসর্ব্বমত্যাগিনাং সকামানামেব প্রেত্যপরত্রভবতি : তেষাংত্রিবিধকর্ম্মসম্ভবাৎ : নতুসংন্যাসিনাংক্ব
চিদপিভবতি : সংন্যাসিশব্দেনাত্রফলত্যাগসাম্যাৎপ্রকৃতাঃকর্ম্মফলত্যাগিনোগৃহ্যন্তে : অনাশ্রিতঃ কর্ম্মফলমিত্যাদিশ্লোকেষুকর্ম্মফলত্যাগিষু সংন্যাসিশব্দপ্রয়োগদর্শনাৎ : তেষাংসাত্ত্বিক

নহিদেহভৃতাশক্যংত্যক্তুংকর্ম্মাণ্যশেষতঃ ২ যস্তুকর্ম্মফলত্যাগীসত্যা গীত্যভিধীয়তে ॥ ১১ ॥ অনিষ্টমিষ্টংমিশ্রঞ্চ ত্রিবিধংকর্ম্মণঃফলং ২ ভবত্যত্যাগিনাং প্রেত্য
নতুসংন্যাসিনাংক্বচিৎ ॥ ১২ ॥ পঞ্চৈতানিমহাবাহোকারণানি নিবোধ মে ২ সাংখ্যেকৃতান্তেপ্রোক্তানি সিদ্ধয়েসর্ব্বকর্ম্মণাং ॥ ১৩ ॥ অধিষ্ঠানংতথা
কর্ত্তাকরণঞ্চপৃথগ্বিধং ২ বিবিধাশ্চপৃথক্চেষ্টাদৈবঞ্চৈবাত্রপঞ্চমং ॥ ১৪ ॥ টী শ্রীধরস্বামীয়া ॥ ১৪ ॥

নাংপাপাসম্ভবাৎ জ্ঞাননিষ্ঠানাঞ্চ পুণ্যপাপফলসম্বন্ধাভাবাৎ : ত্রিবিধমপি কর্ম্মফলংনভবতীত্যর্থঃ ॥ ১২ ॥ ননুকর্ম্মকর্ত্তৃত্বঃ কর্ম্মফলংকথংনভবেদিত্যাশঙ্ক্য যোগিনো নিরহঙ্কারস্যমতঃ কর্ম্মণোলেপো
নাস্তীতি প্রতিপাদয়ন্নাহ : পঞ্চেমানীতি : পঞ্চভিঃ সর্ব্বকর্ম্মণাংসিদ্ধয়ে নিষ্পত্তয়ে ঞমানিকারণানিমেবচনান্নিবোধজানীহি : আত্মনঃকর্ত্তৃত্বাভিমাননিবৃত্তয়ে মমসকাশাত্ এতানিজ্ঞাতব্যানি : জ্ঞেয়ং তেষাং
স্ততোর্থমাহ : সম্যক্খ্যায়তে জ্ঞায়তে পরমাত্মাঅনেনেতি সাংখ্যং : কৃতং কর্ম্মতস্যঅন্তঃ সমাপ্তির্যস্মিন্নিতি কৃতান্তঃ বেদান্তসিদ্ধান্ত ইত্যর্থঃ : যদ্বা সংখ্যায়ন্তে গণ্যন্তে তত্ত্বানি অস্মিন্নিতি সাংখ্যং কৃতান্তঃ
নির্ণয়ো যস্মিন্নিতি : কৃতান্তং সাংখ্যশাস্ত্রমেব তস্মিন্ প্রোক্তানি : অতঃ সম্যগ্বোধেত্যর্থঃ ॥ ১৩ ॥ তান্যেবাহ : অধিষ্ঠানমিতি : অধিষ্ঠানং শরীরং কর্ত্তাচিজ্জড়গ্রন্থিরহঙ্কারঃ : পৃথগ্বি
ধং অনেকবিধং করণংচক্ষুঃশ্রোত্রাদীনি : বিবিধাশ্চপৃথক্চেষ্টাঃ পৃথক্ভূতাশ্চেষ্টাঃ প্রাণাপানাদীনাং ব্যাপারাঃ : অত্রএতেষুপঞ্চমং দৈবং : চক্ষুরাদ্যনুগ্রাহকমাদিত্যাদিসর্ব্বপ্রেরকো

এতেষামেব সর্ব্বকর্ম্মহেতুত্বমাহ : শরীরেতি : যথোক্তৈঃ পঞ্চভিঃ প্রারভ্যমাণঞ্চ স্ববিষয়ে বাক্তর্ত্তৈঃ : শরীরবাঙ্মনোভিরিত্যুক্তং : শারীরং বাচিকং মানসিকঞ্চ ত্রিবিধং প্রসিদ্ধং শরীরাদিভিঃ যৎ কর্ম্ম
ধর্ম্ম্যমধর্ম্ম্যং বা নরঃ করোতি তস্য সর্ব্বস্য কর্ম্মণ এতে পঞ্চ হেতবঃ ॥ ১৫ ॥ ততঃ কিমত আহ : তত্রেতি তত্র তস্মিন্ কর্ম্মণি এতে পঞ্চ হেতবো যদেবং সতি : কেবলং নিরুপাধিং তু যঃ আত্মানং তু যঃ কর্ত্তা
রং পশ্যতি : শাস্ত্রাচার্য্যোপদেশাভ্যামসংস্কৃতবুদ্ধিত্বাৎ : দুর্ম্মতিরসৌ সম্যক্ ন পশ্যতি ॥ ১৬ ॥ তর্হি কঃ সম্যক্ পশ্যতি যস্য কর্ম্মলেপো নাস্তীত্যুক্তং নিত্যপেক্ষায়ামাহ : যস্যেতি : অহমিতি কৃতো ভাবো অহঙ্কারো বা যস্য
স্বভাবোহবিদ্যা যস্য নাস্তি : যদ্বা অহঙ্কৃতো অহঙ্কারো যস্য ভাবঃ স্বভাবঃ কর্ত্তৃত্বাভিনিবেশো যস্য নাস্তি : শরীরাদীনামেব : কর্ত্তৃত্বালোচনাদিতি ভাবঃ : অতএব যস্য বুদ্ধির্ন লিপ্যতে ইষ্টানি

৭০ শ্রীঃ

শরীরবাঙ্মনোভির্যৎ কর্ম্ম প্রারভতে নরঃ। ন্যায্যং বা বিপরীতং বা পঞ্চৈতে তস্য হেতবঃ ॥ ১৫ ॥ তত্রৈবং সতি কর্ত্তারমাত্মানং কেবলন্তু যঃ। পশ্যত্যকৃতবু-
দ্ধিত্বান্ন স পশ্যতি দুর্ম্মতিঃ ॥ ১৬ ॥ যস্য নাহংকৃতো ভাবো বুদ্ধির্যস্য ন লিপ্যতে। হত্বাপি স ইমাঁল্লোকান্ন হন্তি ন নিবধ্যতে ॥ ১৭ ॥
জ্ঞানং জ্ঞেয়ং পরিজ্ঞাতা ত্রিবিধা কর্ম্মচোদনা। করণং কর্ম্ম কর্ত্তেতি ত্রিবিধঃ কর্ম্মসংগ্রহঃ ॥ ১৮ ॥

ষ্টবুদ্ধ্যা কর্ম্মস্বনসজ্জতে : সমমৃত্যু দেহাদি অতিরিক্তাত্মদর্শী ইমান্ লোকান্ প্রাণিনো লোকদৃষ্ট্যা হত্বাপি বিবিক্তাত্মদৃষ্ট্যা ন হন্তি ॥ ন চ তৎফলৈর্নিবধ্যতে : বন্ধং প্রাপ্নোতি : কিম্পুনঃ সত্ত্বশুদ্ধিদ্বারা স পরোক্ষস্তু
লোকে প্রাপ্তং তু ভিন্নশ্চ কর্ম্মাণ্যভিভাবঃ : তদুক্তং ব্রহ্মণ্যাধায় কর্ম্মাণীত্যাদি ॥ ১৭ ॥ হত্বাপি ন হন্তি ন নিবধ্যতে ইতি এতদেবোপপাদয়িতুং কর্ম্মচোদনায়াশ্চ কর্ম্মাশ্রয়স্য চ কর্ম্মফলাদীনাং ত্রিগুণাত্মকত্বান্নির্গুণস্য
আত্মনস্তৎসম্বন্ধো নাস্তীতি অভিপ্রায়েণ কর্ম্মচোদনাং কর্ম্মাশ্রয়ঞ্চাহ : জ্ঞানমিতি জ্ঞানমিষ্টসাধনমেতদিতি বোধঃ : জ্ঞেয়মিষ্টসাধনং কর্ম্ম : পরিজ্ঞাতা এতজ্জ্ঞানাশ্রয়ঃ এবং ত্রিবিধা কর্ম্মচোদনা : চোদ্যতেহনয়েতি চোদনা প্রবর্ত্ত্যতে
নয়েতি : চোদনা জ্ঞানাদি ত্রিতয়ং প্রবৃত্তিহেতুরিত্যর্থঃ : যদ্বা চোদনেতি বিধিরুচ্যতে তদুক্তং ভট্টৈঃ : চোদনা চোপদেশশ্চ বিধিশ্চৈকার্থবাচিন ইতি : অতশ্চায়মর্থঃ উক্তলক্ষণং ত্রিগুণাত্মকং জ্ঞানাদিত্রিতয়মেব নঃ
কর্ম্মবিধিপ্রবর্ত্তকং তদুক্তং : ত্রৈগুণ্যবিষয়া বেদা ইতি : তথা করণং সাধকতমং কর্ম্ম চ কর্ত্তুরীপ্সিততমং কর্ত্তা ক্রিয়ানির্ব্বর্ত্তকঃ : কর্ম্ম সংগৃহ্যতে অস্মিন্নিতি কর্ম্মসংগ্রহঃ করণাদি ত্রিবিধমেব ক্রিয়াশ্রয়কারকমিত্যর্থঃ : সম্প্রদা
নাদিকারকত্রয়ন্তু পরম্পরয়া ক্রিয়ানির্ব্বর্ত্তকমেব কেবলং : ন তু সাক্ষাৎ ক্রিয়াশ্রয়ঃ অতঃ করণাদি ত্রয়মেব ক্রিয়াশ্রয়ত্বেনোক্তং ॥ ১৮ ॥

তচ্চ কিন্তদাহ জ্ঞানমিতি গুণাঃ সত্ত্বকার্য্যভেদেন সংখ্যায়ন্তে প্রতিপাদ্যন্তে যস্মিন্নিতি গুণসংখ্যানং সাংখ্যশাস্ত্রং তস্মিন্ জ্ঞানঞ্চ কর্ম্ম চ কর্ত্তা চ প্রত্যেকং সত্ত্বাদিগুণভেদেন ত্রিবিধৈবোচ্যতে তান্যপি বক্ষ্যমাণা
নানি যথাবচ্ছৃণু। ত্রিধৈবেত্যেবকারেণ গুণত্রয়োপাধিং বিনা বিবেকেনাত্মনঃ স্বতঃ কর্ম্মাদিত্রিতয়ং নাস্তীত্যর্থঃ। চতুর্দ্দশেঽধ্যায়ে ত্রয়াণাং নির্ম্মলত্বাদিনা গুণানাং বন্ধকস্বভাবো নিরূপিতঃ। সপ্তদশেঽধ্যায়ে
যজ্ঞে সাত্ত্বিকাদেরাহারাদিনা গুণকৃতং ত্রিবিধস্বভাবং নিরূপণেন রজস্তমঃস্বভাবং পরিহৃত্য সাত্ত্বিকাহারাদিসেবয়া সাত্ত্বিকস্বভাবঃ সম্পাদনীয় ইত্যুক্তং। অধুনা ক্রিয়াকারকফলাদিনা আত্মসম্বন্ধো
নাস্তীতি দর্শিতং। সর্ব্বেষাং ক্রিয়াগুণাত্মকত্বং যত্নেনাতিবিশেষেণোচ্যত ইত্যর্থঃ ॥ ১৯ ॥ তত্র জ্ঞানস্য সাত্ত্বিকাদিত্রিবিধ্যমাহ সর্ব্বেতি ত্রিভিঃ সর্ব্বভূতেষ্বিতি। সর্ব্বেষু ভূতেষু ব্রহ্মাদিস্থাবরান্তেষু বিভক্তেষু পরস্পর

জ্ঞানং কর্ম্ম চ কর্ত্তা চ ত্রিধৈব গুণভেদতঃ। প্রোচ্যতে গুণসংখ্যানে যথাবচ্ছৃণু তান্যপি ॥ ১৯ ॥ সর্ব্বভূতেষু যেনৈকং ভাবমব্যয়মীক্ষতে।
অবিভক্তং বিভক্তেষু তজ্জ্ঞানং বিদ্ধি সাত্ত্বিকং ॥ ২০ ॥ পৃথক্ত্বেন তু যজ্জ্ঞানং নানাভাবান্ পৃথগ্বিধান্। বেত্তি সর্ব্বেষু ভূতেষু তজ্জ্ঞানং
বিদ্ধি রাজসং ॥ ২১ ॥ যত্তু কৃৎস্নবদেকস্মিন্ কার্য্যে সক্তমহৈতুকং। অতত্ত্বার্থবদল্পঞ্চ তত্তামসমুদাহৃতং ॥ ২২ ॥

স্থাবরান্তেষু অবিভক্তমনুস্যূতমেকমব্যয়ং নির্ব্বিকারং ভাবং পরমাত্মতত্ত্বং যেন জ্ঞানেন জীবঃ ঈক্ষতে আলোচয়তি তজ্জ্ঞানং সাত্ত্বিকং বিদ্ধি ॥ ২০ ॥ রাজসজ্ঞানমাহ পৃথক্ত্বেনেতি। পৃথক্ত্বেন তু যজ্জ্ঞানং
নিমিত্তভূতেন সর্ব্বভূতেষু দেহেষু নানাভাবান্ বস্তুতোঽনেকান্ ক্ষেত্রজ্ঞান্ পৃথগ্বিধান্ সুখিদুঃখিত্বাদিরূপেণ বিলক্ষণান্ যেন জ্ঞানেন বেত্তি তজ্জ্ঞানং রাজসং বিদ্ধি ॥ ২১ ॥
তামসজ্ঞানমাহ যত্ত্বিতি। একস্মিন্ কার্য্যে দেহে প্রতিমাদৌ বা কৃৎস্নবৎ পরিপূর্ণবৎ সক্তং এতাবানেবাত্মা ঈশ্বরো বেতি অভিনিবেশযুক্তং। অহৈতুকং নিরুপপত্তিকং অতত্ত্বা
র্থবৎ পরমার্থালম্বনশূন্যং অল্পঞ্চ তুচ্ছং অল্পবিষয়ত্বাদল্পফলত্বাচ্চ যদেবম্ভূতং জ্ঞানং তত্তামসমুদাহৃতং ॥ ২২ ॥ ওঁ নমো ভগবতে

ইদানীং কর্ম্মত্রৈবিধ্যমাহ : নিয়তমিতি ত্রিভিঃ : নিয়তং নিত্যতয়া বিহিতং সঙ্গরহিতং অভিনিবেশশূন্যং : অরাগদ্বেষতঃ পুত্রাদ্যপ্রীত্যা শত্রুদ্বেষেণ বা যৎকৃতং ন ভবতি : ফলং প্রাপ্তুমিচ্ছতীতি ফলপ্রেপ্সুঃ তদ্ভিন্নেন
নিষ্কামেন কর্ত্রা যৎকৃতং তৎ সাত্ত্বিকমুচ্যতে ॥ ২৩ ॥ যত্ত্বিতি : যত্তু কামেপ্সুনা ফলং প্রাপ্তুমিচ্ছতা সাহঙ্কারেণ বা : মৎসমঃ কোঽন্যঃ শ্রোত্রিয়োঽস্তীত্যেবং নিরূঢাহঙ্কারযুক্তেন ক্রিয়তে : যচ্চ
বহুলায়াসং অতিক্লেশযুক্তং তৎকর্ম্ম রাজসমুদাহৃতং ॥ ২৪ ॥ অনুবন্ধমিতি : অনুবধ্যত ইতি অনুবন্ধঃ পশ্চাদ্ভাবি শুভাশুভং ক্ষয়ং বিত্তব্যয়ং হিংসাং পরপীড়াং পৌরুষং স্বসামর্থ্যঞ্চ
অনপেক্ষ্য অপর্য্যালোচ্য কেবলং মোহাদেব যৎকর্ম্মারভ্যতে তত্তামসমুদাহৃতং ॥ ২৫ ॥ কর্ত্তারং ত্রিবিধমাহ : মুক্তসঙ্গ ইতি : মুক্তসঙ্গঃ ত্যক্তাভিনিবেশঃ : অনহংবাদী গর্ব্বোক্তিশূন্যঃ : ধৃতি

শ্রী
নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতং । অফলপ্রেপ্সুনা কর্ম্ম যত্তৎ সাত্ত্বিকমু- চ্যতে ॥ ২৩ ॥ যত্তু কামেপ্সুনা কর্ম্ম সাহঙ্কারেণ বা পুনঃ ।
গী ৭৪ ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতং ॥ ২৪ ॥ অনুবন্ধং ক্ষয়ং হিং- সামনপেক্ষ্য চ পৌরুষং । মোহাদারভ্যতে কর্ম্ম যত্তত্তামসমুচ্য-
তে ॥ ২৫ ॥ মুক্তসঙ্গোঽনহংবাদী ধৃত্যুৎসাহসমন্বিতঃ । সিদ্ধ্যসিদ্ধ্যোর্নির্ব্বিকারঃ কর্ত্তা সাত্ত্বিক উচ্যতে ॥ ২৬ ॥ রাগী কর্ম্মফলপ্রে-
প্সুর্লুব্ধো হিংসাত্মকোঽশুচিঃ । হর্ষশোকান্বিতঃ কর্ত্তা রাজসঃ পরিকীর্ত্তিতঃ ॥ ২৭ ॥ অযুক্তঃ প্রাকৃতঃ স্তব্ধঃ শঠো নৈষ্কৃতিকোঽলসঃ । বিষাদী দীর্ঘসূত্রী চ কর্ত্তা তামস-

ধৈর্য্যং উৎসাহ উদ্যমঃ তাভ্যাং সমন্বিতঃ সংযুক্তঃ : আরব্ধস্য কর্ম্মণঃ সিদ্ধাবসিদ্ধৌ চ : নির্ব্বিকারঃ হর্ষবিষাদশূন্যঃ : এবংভূতঃ কর্ত্তা সাত্ত্বিক উচ্যতে ॥ ২৬ ॥ রাগীতি : পুত্রাদিষু প্রীতিমান্ : কর্ম্মফ-
লপ্রেপ্সুঃ কর্ম্মফলকামী : লুব্ধঃ পরস্বাভিলাষী : হিংসাত্মকঃ মারকস্বভাবঃ : অশুচিঃ বিহিতশৌচশূন্যঃ : লাভালাভয়োর্হর্ষশোকাভ্যাং সমন্বিতঃ কর্ত্তা রাজসঃ ॥ ২৭ ॥ অযুক্ত ইতি : অযুক্তোঽনব-
হিতঃ প্রাকৃতঃ বিবেকশূন্যঃ স্তব্ধোঽনম্রঃ : শঠঃ শক্তিগূহনকারী : নৈষ্কৃতিকঃ পরাবমানী : অলসোঽপ্রবৃত্তিশীলঃ : বিষাদী শোকশীলঃ : যদদ্য শ্বো বা কার্য্যং তন্মাসেনাপি সম্পাদয়তীতি সদীর্ঘ-
সূত্রী : এবংভূতস্তামসঃ : কর্ত্তৃত্রৈবিধ্যেনাপ্যত্র বর্ণিতমেবমুক্তং : কর্ম্মত্রৈবিধ্যেন চ জ্ঞেয়স্যাপি ত্রৈবিধ্যমুক্তং বেদিতব্যং : বুদ্ধেস্ত্রৈবিধ্যেন চ করণস্যাপি ত্রৈবিধ্যমাহ ॥ ২৮ ॥

জীদানীং বুদ্ধের্দ্ধৃতেশ্চ ত্রৈবিধ্যং প্রতিজানীতে : বুদ্ধেরিতি : স্পষ্টার্থঃ ॥ ২৯ ॥ তত্র বুদ্ধেস্ত্রৈবিধ্যমাহ : প্রবৃত্তিঞ্চেতি : প্রবৃত্তিং ধর্ম্মে : নিবৃত্তিমধর্ম্মে : যস্মিন্দেশেকালেচ যৎকার্য্যমকার্য্যঞ্চ তয়োস্তথা ভয়াভয়ে : কার্য্যাকার্য্যনিমিত্তৌ : অ
র্থানর্থৌ কর্ম্মণাং বন্ধঞ্চ কর্ম্মণাং মোক্ষঞ্চেতি যা বুদ্ধির্জ্জানং করণং বেত্তি সা সাত্ত্বিকী : যয়া প্রমাণং বেত্তি জন্তুস্তজ্জ্ঞানস্য কর্ত্তৃত্বেন করণত্বোপচারাৎ কাপ্যনিপাতনমিতি ॥৩০॥ যয়েতি : অযথাবৎ সন্দেহাস্পদত্বেনেত্যর্থঃ : স্পষ্টমন্যৎ ॥৩১॥
অধর্ম্মমিতি : বিপরীতগ্রাহিণী বুদ্ধিস্তামসীত্যর্থঃ : বুদ্ধিস্বরূপং প্রাগ্ব্যাখ্যাতং তত্র ধৃতিরিতি বুদ্ধেস্তিরোধিতং স্থিরতা : যদ্বা মনস্করণস্য ধর্ম্মিণো বুদ্ধিস্বস্বব্যবসায়নক্ষণাদি স্থিরতা : জীচ্ছাদ্বেষাদীনাং তদ্বৃত্তীনাং ব্যক্তাব
পি ধর্ম্মাধর্ম্মাবগাহনাৎ প্রাধান্যাদত্রাসাং ত্রৈবিধ্যমুক্তং : জ্ঞানপ্রকরণস্থত্বাদন্যাসাং ॥৩২॥ ইদানীং ধৃতেস্ত্রৈবিধ্যমাহ : ধৃত্যেতি ত্রিভিঃ : ধৃত্যেতি : যোগেনৈতচিত্তৈকাগ্র্যেণ হেতুনা : অব্যভিচারিণ্যা : বিষয়ান্তরে
বুদ্ধের্ভেদং ধৃতেশ্চৈব গুণতস্ত্রিবিধং শৃণু । প্রোচ্যমানমশেষেণ পৃথক্ত্বেন ধনঞ্জয় ॥ ২৯ ॥ প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ কার্য্যাকার্য্যে ভয়াভয়ে । বন্ধং মোক্ষঞ্চ যা বেত্তি বুদ্ধিঃ সা পার্থ
সাত্ত্বিকী ॥৩০॥ যয়া ধর্ম্মমধর্ম্মঞ্চ কার্য্যঞ্চাকার্য্যমেব চ । অযথাবৎ প্রজানাতি বুদ্ধিঃ সা পার্থ রাজসী ॥৩১॥ অধর্ম্মং ধর্ম্মমিতি যা মন্যতে তমসাবৃতা । সর্ব্বার্থান্ বিপরীতাংশ্চ
বুদ্ধিঃ সা পার্থ তামসী ॥৩২॥ ধৃত্যা যয়া ধারয়তে মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ । যোগেনাব্যভিচারিণ্যা ধৃতিঃ সা পার্থ সাত্ত্বিকী ॥৩৩॥ যয়া তু ধর্ম্মকামার্থান্ ধৃত্যা ধারয়তেঽর্জ্জুন । প্রসঙ্গেন
ফলাকাঙ্ক্ষী ধৃতিঃ সা পার্থ রাজসী ॥৩৪॥ যয়া স্বপ্নং ভয়ং শোকং বিষাদং মদমেব চ । ন বিমুঞ্চতি দুর্ম্মেধা ধৃতিঃ সা পার্থ তামসী ॥৩৫॥ সুখং ত্বিদানীং ত্রিবিধং শৃণু মে ভরতর্ষভ । অভ্যাসাদ্রমতে যত্র দুঃখান্তঞ্চ নিগচ্ছতি ॥৩৬॥
বমব্যাহৃতা যয়া ধৃত্যা মনঃপ্রাণেন্দ্রিয়াণাং ক্রিয়া ধারয়তে নিয়চ্ছতি সা ধৃতিঃ সাত্ত্বিকী ॥৩৩॥ রাজসীং ধৃতিমাহ : যয়েতি : যয়া ধৃত্যা ধর্ম্মার্থকামান্ প্রাধান্যেন ধারয়তে ন বিমুঞ্চতি প্রসঙ্গেন ফলা
কাঙ্ক্ষী চ ভবতি সা রাজসী ধৃতিঃ ॥৩৪॥ তামসীং ধৃতিমাহ : যয়েতি দুর্ম্মেধা অবিবেকবুদ্ধিরবিদ্বান্ : স্বপ্নাদীন্ ধারয়তে যয়া ধৃত্যা স্বপ্নাদীন্ন বিমুঞ্চতি : পুনঃ পুনরাবর্ত্তয়তি : স্বপ্নোঽত্র নিদ্রা সা
ধৃতিস্তামসী ॥৩৫॥ সুখস্য ত্রৈবিধ্যং প্রতিজানীতে : সুখমিতি স্পষ্টার্থঃ । তত্র সাত্ত্বিকং সুখমাহ : অভ্যাসাদিতি সার্দ্ধেন : অভ্যাসাদিতি : যত্র যস্মিন্ সুখে : অভ্যাসাদ্
তিপরিচয়াদ্রমতে ন তু বিষয়সম্বন্ধমাত্রতঃ সহসা রতিং প্রাপ্নোতি । যস্মিংশ্চ রমমাণো দুঃখস্যান্তমবসানং নিতরাং গচ্ছতি ॥ ৩৬ ॥ ওঁ নমো ভগবতে বাসুদেবায় ॥

৭৮ কীদৃশং তৎ যত্তদিতি যৎ অগ্রে প্রথমং বিষমিব মনইন্দ্রিয়সংযমাধীনত্বাদ্দুঃখমিব ভবতি : পরিণামে অমৃতসদৃশং : আত্মবিষয়া বুদ্ধিস্তস্যাঃ প্রসাদো রজস্তমোমলত্যাগেন স্বচ্ছতয়াবস্থানং : ততো জাতং যৎ সুখং তৎ সাত্ত্বি-
কং প্রোক্তং যোগিভিঃ ॥৩৭॥ রাজসং সুখমাহ বিষয়েতি : বিষয়াণামিন্দ্রিয়াণাঞ্চ সংযোগাদ্যত্তৎ প্রসিদ্ধং স্ত্রীসঙ্গাদিসুখং অমৃততুল্যং যস্য তদমৃতোপমং ভবতি : অগ্রে প্রথমং পরিণামে বিষতুল্যং : জীর্যতে চ দৃশ্যাদেস্তস্মাৎ তৎ সুখং
রাজসং স্মৃতং ॥৩৮॥ তামসং সুখমাহ যদিতি : অগ্রে প্রথমক্ষণে অনুবন্ধে চ পশ্চাদপি যৎ সুখং আত্মনো মোহকরং তদেবাহ : নিদ্রা চালস্যঞ্চ প্রমাদশ্চ কর্তব্যার্থাবধানরাহিত্যেন মনোবাহ্যং এতেভ্য উত্তিষ্ঠতি যৎ সুখং তৎ
তামসমুদাহৃতং ॥৩৯॥ অধ্যায়ার্থমুপসংহরন্ প্রকরণার্থমুপসংহরতি নতদিতি : এভিঃ প্রকৃতিসম্ভবৈঃ সত্ত্বাদিভিস্ত্রিভির্গুণৈর্নির্মুক্তং হীনং সত্ত্বং প্রাণিজাতং মনুষ্যাদিমধ্যে তদ্ধি পৃথিব্যাং মনুষ্যাদিষু : দিবি দেবেষু : ~~ক~~

যত্তদগ্রে বিষমিব পরিণামেঽমৃতোপমং । তৎ সুখং সাত্ত্বিকং প্রোক্তমাত্মবুদ্ধিপ্রসাদজং ॥ ॥ ৩৭ ॥ বিষয়েন্দ্রিয়সংযোগাদ্যত্তদগ্রেঽমৃতোপমং । ২

৭২ শ্রী ৭৩ পরিণামে বিষমিব তৎ সুখং রাজসং স্মৃতং ॥ ॥ ৩৮ ॥ যদগ্রে চানুবন্ধে চ সুখং মোহনমাত্মনঃ । ২ নিদ্রালস্যপ্রমাদোত্থং তত্তামসমু-

দাহৃতং ॥ ॥ ৩৯ ॥ ন তদস্তি পৃথিব্যাং বা দিবি দেবেষু বা পুনঃ । ২ সত্ত্বং প্রকৃতিজৈর্মুক্তং যদেভিঃ স্যাত্রিভির্গুণৈঃ ॥ ৪০ ॥

ব্রাহ্মণক্ষত্রিয়বিশাং শূদ্রাণাঞ্চ পরন্তপ । ২ কর্মাণি প্রবিভক্তানি স্বভাবপ্রভবৈর্গুণৈঃ ॥ ॥ ৪১ ॥

চ কোঽপি নাস্তীত্যর্থঃ ॥৪০॥ ননু যদ্যেবং সর্বমপি ক্রিয়াকারকফলাদিকং প্রাণিজাতঞ্চ ত্রিগুণাত্মকমেব কথন্তর্হি মোক্ষঃ : জাতঃ অপেক্ষায়াং স্বস্বাধিকারবিহিতৈঃ কর্মভিঃ পরমেশ্বরারাধনাত্তৎপ্রসাদলব্ধজ্ঞানেনেত্যেবং
সর্বগীতার্থসারং সংক্ষিপ্য দর্শয়িতুং প্রকরণান্তরমারভতে ব্রাহ্মণেত্যাদি যাবৎ সমাপ্তিঃ : হে পরন্তপ শত্রুতাপন ব্রাহ্মণানাং ক্ষত্রিয়াণাং শূদ্রাণাঞ্চ কর্মাণি প্রবিভক্তানি প্রকর্ষেণ বিভাগতো বিহিতানি
শূদ্রাণাং সমাসাৎ পৃথক্করণং দ্বিজত্বাভাবেন বেদানধিকারাৎ বিভাগোপলক্ষণমাহ : স্বভাবঃ সাত্ত্বিকাদিঃ প্রভব উদ্ভবো যেষাং তৈর্গুণৈরুপলক্ষণভূতৈঃ : যদ্বা স্বভাবঃ পূর্বজন্মসংস্কারঃ তস্মা-
ৎ প্রাদুর্ভূতৈরিত্যর্থঃ । সত্ত্বপ্রধানা ব্রাহ্মণাঃ । সত্ত্বোপসর্জনরজঃপ্রধানাঃ ক্ষত্রিয়াঃ : তমউপসর্জনরজঃপ্রধানা বৈশ্যাঃ : রজউপসর্জনতমঃপ্রধানাঃ শূদ্রাঃ ॥ ৪১ ॥

তত্র ব্রাহ্মণস্য স্বাভাবিকানি কর্ম্মাণ্যাহ শম ইতি : শমশ্চিত্তোপশমঃ : দমো বাহ্যেন্দ্রিয়োপশমঃ তপঃ পূর্ব্বোক্তং শারীরাদি : শৌচং বাহ্যাভ্যন্তরং : ক্ষান্তিঃ ক্ষমা : আর্জ্জবমবক্রতা জ্ঞানং শাস্ত্রীয়ং : বিজ্ঞানমনুভবঃ ২ আ
স্তিক্যং অস্তি পরলোক ইতি নিশ্চয়ঃ এতচ্ছমাদি ব্রাহ্মণস্য স্বভাবজং কর্ম্ম ॥ ৪২ ॥ ক্ষত্রিয়স্য স্বাভাবিকং কর্ম্মাহ : শৌর্য্যমিতি শৌর্য্যং পরাক্রমঃ : তেজঃ প্রাগল্ভ্যং : ধৃতির্ধৈর্য্যং দাক্ষ্যং কৌশলং : যুদ্ধে চাপ্যপ
লায়নং অপরাঙ্মুখতা দানমৌদার্য্যং ঈশ্বরভাবো নিয়মনশক্তিঃ এতৎ ক্ষত্রিয়স্য স্বভাবজং কর্ম্ম ॥ ৪৩ ॥ বৈশ্যশূদ্রয়োঃ কর্ম্মাহ : কৃষীতি : কৃষিঃ কর্ষণং : গাঃ রক্ষতীতি গোরক্ষস্তস্য ভাবো গৌরক্ষ্যং পাশুপা
ল্যমিত্যর্থঃ : বাণিজ্যং ক্রয়বিক্রয়াদি এতদ্বৈশ্যস্য স্বভাবজং কর্ম্ম : পরিচর্য্যাত্মকং শূদ্রস্যাপি স্বভাবজং কর্ম্ম ॥ ৪৪ ॥ এবম্ভূতস্যাপি ব্রাহ্মণাদিকর্ম্মণো জ্ঞানহেতুত্বমাহ : স্বে স্ব ইতি স্বে স্বে

শমো দমস্তপঃ শৌচং ক্ষান্তিরার্জ্জবমেব চ । জ্ঞানং বিজ্ঞানমাস্তিক্যং ব্রহ্মকর্ম্ম স্ব
ভাবজং ॥ ৪২ ॥ শৌর্য্যং তেজো ধৃতির্দাক্ষ্যং যুদ্ধে চাপ্যপলায়নং । দানমীশ্ব
রভাবশ্চ ক্ষাত্রং কর্ম্ম স্বভাবজং ॥ ৪৩ ॥ কৃষিগোরক্ষ্যবাণিজ্যং বৈশ্যকর্ম্ম স্বভাবজং ।
পরিচর্য্যাত্মকং কর্ম্ম শূদ্রস্যাপি স্বভাবজং ॥ ৪৪ ॥ স্বে স্বে কর্ম্মণ্যভিরতঃ
সংসিদ্ধিং লভতে নরঃ । স্বকর্ম্মনিরতঃ সিদ্ধিং যথা বিন্দতি তচ্ছৃণু ॥ ৪৫
॥ যতঃ প্রবৃত্তির্ভূতানাং যেন সর্ব্বমিদং ততং । স্বকর্ম্মণা তমভ্যর্চ্য সিদ্ধিং বিন্দতি
মানবঃ ॥ ৪৬ ॥ শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ ।
স্বভাবনিয়তং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষং ॥ ৪৭ ॥

কাৰ্যবিহিতকর্ম্মণ্যভিরতঃ পরিনিষ্ঠিতো নরঃ সংসিদ্ধিং জ্ঞানযোগ্যতাং লভতে : কর্ম্মণো জ্ঞানপ্রাপ্তিপ্রকারমাহ : স্বে স্বে কর্ম্মেতি সার্দ্ধেন : স্বকর্ম্মণি পরিনিষ্ঠিতো যথা যেন প্রকারেণ জ্ঞানং লভতে তং
প্রকারং শৃণু : ॥ ৪৫ ॥ তমেবাহ : যত ইতি যতোন্তর্য্যামিনঃ পরমেশ্বরাদ্ভূতানাং প্রাণিনাং প্রবৃত্তিশ্চেষ্টা ভবতি : যেন কারণাত্মনা সর্ব্বমিদং বিশ্বং ততং ব্যাপ্তং তমীশ্বরং স্বকর্ম্মণাভ্যর্চ্য পূজয়িত্বা সিদ্ধিং লভতে
মনুষ্যঃ ॥ ৪৬ ॥ স্বকর্ম্মণেতি বিশেষণস্য ফলমাহ : শ্রেয়ানিতি : বিগুণোপি স্বধর্ম্মঃ সম্যগনুষ্ঠিতাদপি পরধর্ম্মাচ্ছ্রেষ্ঠঃ তত্র হেতু যথাদিমজাং মত্স্যাদেঃ স্বধর্ম্মাৎ পরধর্ম্মোতিমধাটনাদিঃ প
রমধর্ম্ম ইতি মন্তব্যং ২ যতঃ স্বভাবেন প্রাধান্যেন স্বকর্ম্মনিষ্ঠিতো যঃ প্রাধান্যেন নিয়মেনোক্তং : কর্ম্ম কুর্ব্বন্ কিল্বিষং নাপ্নোতি ॥ ৪৭ ॥ হরায় নমঃ

যদি পুনঃ সাংখ্যদৃষ্ট্যা স্বধর্ম্মে হিংসাদিলক্ষণং দোষমত্বা পরধর্ম্মঃ শ্রেয়ান্ মন্যতে তর্হি সদোষত্বং পরধর্ম্মস্যাপি তুল্যমিত্যাশয়েনাহ সহজমিতি : সহজং স্বভাববিহিতং কর্ম্ম সদোষমপি ন ত্যজেৎ : হি যস্মাৎ সর্ব্বেপ্যারম্ভা দৃষ্টা
দৃষ্টার্থানি সর্ব্বাণ্যপি কর্ম্মাণি দোষেণ কেনচিদাবৃতান্যেব : যথা সহজেন ধূমেনাগ্নিরাবৃতস্তথা : অতো যথাগ্নেঃ ধূমরূপং দোষমপাকৃত্য প্রতাপ এব তমঃশীতাদিনিবৃত্তয়ে সেব্যতে : তথা কর্ম্মণো
পি দোষাংশমপহায় গুণাংশ এব সত্ত্বশুদ্ধয়ে সেব্যত ইত্যর্থঃ ॥ ৪৮ ॥ এবম্ভূতকর্ম্মক্রিয়মাণো দোষাংশপ্রহাণেন তন্নাশের সম্যক্ সত্ত্বোৎকর্ষ্যা যায়াসাৎ : অসক্তবুদ্ধিরিতি : অসক্তা সঙ্গশূন্যা বুদ্ধির্য
স্য : জিতাত্মা নিরহঙ্কারঃ বিগতা ফলবিষয়া স্পৃহা যস্মাৎ : স এবম্ভূতেন যোগেন সংযোগঃ সাত্ত্বিকো সত্ত্বালোকপূর্ব্বোক্তেন কর্ম্মাসক্তিফলত্যাগলক্ষণেন সংন্যাসেন নৈষ্কর্ম্যসিদ্ধিং সর্ব্বকর্ম্মনিবৃত্তিলক্ষ

৭৩ শ্রীঃ সহজং কর্ম্ম কৌন্তেয় সদোষমপি ন ত্যজেৎ ২ সর্ব্বারম্ভা হি দোষেণ ধূমেনাগ্নিরিবাবৃতাঃ ॥ ৪৮ ॥ অসক্তবুদ্ধিঃ সর্ব্বত্র জিতাত্মা বিগতস্পৃহঃ ২
নৈষ্কর্ম্যসিদ্ধিং পরমাং সংন্যাসেনাধিগচ্ছতি ॥ ৪৯ ॥ সিদ্ধিং প্রাপ্তো যথা ব্রহ্ম তথাপ্নোতি নিবোধ মে ২ সমাসেনৈব কৌন্তেয় নিষ্ঠা জ্ঞানস্য যা প
রা ॥ ৫০ ॥ বুদ্ধ্যা বিশুদ্ধয়া যুক্তো ধৃত্যাত্মানং নিয়ম্য চ ২ শব্দাদীন্ বিষয়াংস্ত্যক্ত্বা রাগদ্বেষৌ ব্যুদস্য চ ॥ ৫১ ॥

ণাং সিদ্ধিং সত্ত্বশুদ্ধিমধিগচ্ছতি : যদ্যপি সঙ্গফলয়োস্ত্যাগেন কর্ম্মানুষ্ঠানমপি নৈষ্কর্ম্যমেব কর্ত্তৃত্বাভিনিবেশাভাবাৎ : তদুক্তং নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিৎ : জায়োদিশ্লোকচতুষ্টয়ে
ন তথাপ্যনেনোক্তলক্ষণেন সংন্যাসেন পরমাং নৈষ্কর্ম্যসিদ্ধিং : সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে সুখং বশী ইত্যেবংলক্ষণাং পারমহংস্যপরিচর্য্যাং প্রাপ্নোতি ॥ ৪৯ ॥ এবম্ভূতস্য পরমহংসস্য জ্ঞাননিষ্ঠয়া
ব্রহ্মভাবমাহ : সিদ্ধিং প্রাপ্তস্তত্ত্বজিজ্ঞাসুঃ : সিদ্ধিমিতি : নৈষ্কর্ম্যসিদ্ধিং প্রাপ্তঃ সন্ যথা যেন প্রকারেণ ব্রহ্ম প্রাপ্নোতি : তথা তং প্রকারং সংক্ষেপেণৈব মে বচনান্নিবোধ ॥ ৫০ ॥ তদেবাহ : বুদ্ধ্যেতি ত্রিভিঃ উক্তেন
প্রকারেণ বিশুদ্ধয়া পূর্ব্বং জয়া সাত্ত্বিক্যা বুদ্ধ্যা যুক্তঃ ধৃত্যা সাত্ত্বিক্যাত্মানং তামেব বুদ্ধিং নিয়ম্য নিশ্চলাং কৃত্বা শব্দাদীন্ বিষয়াংস্ত্যক্ত্বা তদ্বিষয়ৌ রাগদ্বেষৌ চ ব্যুদস্য বুদ্ধ্যা বিশুদ্ধয়েত্যাদিনা ব্রহ্মভূয়ায় কল্পত ইতি
তৃতীয়েনান্বয়ঃ ॥ ৫১ ॥

বিবিক্তসেবীতি : বিবিক্তসেবী শুচিদেশস্থায়ী : লঘ্বাশী মিতভোজী এভিরুপায়ৈঃ বাক্কায়মনসঃ সংযতবাগ্দেহচিত্তো ভূত্বা নিত্যং সর্বদা ধ্যানেন যো যোগস্তৎপরঃ ব্রহ্মসম্পর্কশূন্যঃ পরঃ সন্ ধ্যানাবিরতেদার্ঢ্যায় বৈরাগ্যং সম্য
গাশ্রিত্য ॥ ৫২ ॥ অহঙ্কারমিতি ততো বিশুদ্ধোহমিত্যাদি অহঙ্কারং বলং দুরাগ্রহং দর্পং যোগবলাদুন্মার্গপ্রবৃত্তিলক্ষণং প্রারব্ধবশাৎ প্রাপ্যমানেষ্বপি বিষয়েষু কামং ক্রোধং পরিগ্রহঞ্চ বিমুচ্য : বিশেষেণ ত্যক্ত্বা : বলাদাপ
তিতেষু চ নির্মমঃ সন্ শান্তঃ পরমামুপশান্তিং প্রাপ্তো ব্রহ্মভূয়ায় ব্রহ্মাহমিতি নৈশ্চল্যেনাবস্থানায় কল্পতে যোগ্যো ভবতি ॥ ৫৩ ॥ ব্রহ্মাহমিতি : নৈশ্চল্যেনাবস্থানস্য ফলমাহ ব্রহ্মভূত ইতি : ব্রহ্মভূতো ব্রহ্মণ্যবস্থি
তঃ প্রসন্নচিত্তঃ নষ্টং ন শোচতি : নচাপ্রাপ্তং কাঙ্ক্ষতি : দেহাদ্যভিমানাভাবাৎ : অতএব সর্বেষু ভূতেষ্বপি সমঃ সন্ রাগদ্বেষাদিকৃতবিক্ষেপাভাবাৎ : সর্বভূতেষু মদ্ভাবনালক্ষণাং পরাং মদ্ভক্তিং লভতে ॥ ৫৪ ॥

বিবিক্তসেবী লঘ্বাশী যতবাক্কায়মানসঃ । ধ্যানযোগপরো নিত্যং বৈরাগ্যং স মুপাশ্রিতঃ ॥ ৫২ ॥ অহঙ্কারং বলং দর্পং কামং ক্রোধং পরিগ্রহং । বিমুচ্য নি
র্মমঃ শান্তো ব্রহ্মভূয়ায় কল্পতে ॥ ৫৩ ॥ ব্রহ্মভূতঃ প্রসন্নাত্মা ন শোচতি ন কা ঙ্ক্ষতি । সমঃ সর্বেষু ভূতেষু মদ্ভক্তিং লভতে পরাং ॥ ৫৪ ॥ ভক্ত্যা মামভিজ
ানাতি যাবান্ যশ্চাস্মি তত্ত্বতঃ । ততো মাং তত্ত্বতো জ্ঞাত্বা বিশতে তদনন্তরং ॥ ৫৫ ॥ সর্বকর্মাণ্যপি সদা কুর্বাণো মদ্ব্যপাশ্রয়ঃ । মৎপ্রসাদাদবাপ্নো
তি শাশ্বতং পদমব্যয়ং ॥ ৫৬ ॥ চেতসা সর্বকর্মাণি ময়ি সংন্যস্য মৎপরঃ । বুদ্ধিযোগমুপাশ্রিত্য মচ্চিত্তঃ সততং ভব ॥ ৫৭ ॥

ভক্ত্যেতি ততশ্চ তয়া ভক্ত্যা তত্ত্বতো মামভিজানাতি : কথম্ভূতং যাবান্ সর্বব্যাপী যশ্চাস্মীতি : সর্বদানন্দঘনঃ : তথাভূতং তত্ত্বতো মামেবং জ্ঞাত্বা তদনন্তরং তস্য জ্ঞানস্যাপ্যুপরমে সতি মামেব বিশতে : পরমানন্দ
রূপো ভবতীত্যর্থঃ ॥ ৫৫ ॥ স্বকর্মভিঃ পরমেশ্বরারাধনাত্ জ্ঞাননিষ্ঠাপ্রকারমুপসংহরতি : সর্বকর্মাণীতি : সর্বাণি নিত্যনৈমিত্তিকানি প্রযোজকাম্যানি কুর্বাণো মদ্ব্যপাশ্রয়ঃ অহমেব ব্যপাশ্রয়ঃ আশ্রয়ণীয়ো
যস্য সঃ : মৎপ্রসাদাৎ শাশ্বতমনাদিমব্যয়ং নিত্যং সর্বোৎকৃষ্টপদং প্রাপ্নোতি ॥ ৫৬ ॥ যস্মাদেবং তস্মাৎ সর্বাণি কর্মাণি চেতসা সংন্যস্য সমর্প্য মৎপরঃ : অহমেব পরঃ প্রাপ্যঃ পুরুষার্থো য
স্য সঃ : ব্যবসায়াত্মিকয়া বুদ্ধ্যা যোগমাশ্রিত্য সর্বকর্মানুষ্ঠানকালেপি ব্রহ্মার্পণং ব্রহ্মহবিরিতি ন্যায়েন ময্যেব চিত্তং যস্য তথাভূতো ভব ॥ ৫৭ ॥ রামায় নমঃ ॥

৮৫

ত্ততো ভবিষ্যসীত্যর্থঃ তদেবমাহ মচ্চিত্ত ইতি। মচ্চিত্তঃ সন্ মৎপ্রসাদাৎ সর্ব্বাণি দুর্গাণ্যপি সাংসারিকদুঃখানি তরিষ্যসি। বিপক্ষে দোষমাহ অথ চেদ্যদি পুনস্ত্বং অহঙ্কারাজ্জ্ঞাতৃত্বাভিমানাৎ মদুক্তং ন শ্রোষ্যসি ত
র্হি বিনঙ্ক্ষ্যসি পুরুষার্থাদ্ভ্রংশিষ্যসি ॥৫৮॥ কামমগ্নিং প্রবিশামি ন তু বন্ধুবধপাতকং বন্ধুভির্যুদ্ধং করিষ্যামীতি চেত্তত্রাহ যদহঙ্কারমিতি। মদাজ্ঞামনাদৃত্য কেবলমহঙ্কারমবলম্ব্য যুদ্ধং ন করিষ্যামীতি যন্মন্যসে ত্ব
মধ্যবস্যসি এষ তব ব্যবসায়ো মিথ্যৈব অস্বতন্ত্রত্বাৎ। তদেবাহ প্রকৃতিস্ত্বাং রজোগুণরূপেণ পরিণতা সতী নিযোক্ষ্যতি যুদ্ধে প্রবর্ত্তয়িষ্যত্যেব ॥৫৯॥ কিঞ্চ স্বভাবজেনেতি। স্বভাবঃ ক্ষত্রিয়ত্বহেতুঃ পূর্ব্বকর্ম্মসংস্কারঃ
তস্মাজ্জাতেন স্বীয়েন কর্ম্মণা শৌর্য্যাদিনা পূর্ব্বোক্তেন নিবদ্ধো যন্ত্রিতস্ত্বং মোহাদ্যুদ্ধং কর্ত্তুং নেচ্ছসি অবশোঽপি তৎ কর্ম্ম করিষ্যস্যেব ॥৬০॥ তদেবং শ্লোকদ্বয়েন সাঙ্খ্যাদিমতেন প্রকৃতিপারতন্ত্র্যং কর্ম্ম

মচ্চিত্তঃ সর্ব্বদুর্গাণি মৎপ্রসাদাত্তরিষ্যসি ২ অথ চেত্ত্বমহঙ্কারান্ন শ্রোষ্যসি বিনঙ্ক্ষ্যসি ॥৫৮॥ যদহঙ্কারমাশ্রিত্য ন যোৎস্য ইতি মন্যসে ২
শ্রী৭৭ মিথ্যৈষ ব্যবসায়স্তে প্রকৃতিস্ত্বাং নিযোক্ষ্যতি ॥৫৯॥ স্বভাবজেন কৌন্তেয় নিবদ্ধঃ স্বেন কর্ম্মণা ২ কর্ত্তুং নেচ্ছসি যন্মোহাৎ করিষ্যস্যবশোঽপি তৎ
॥৬০॥ ঈশ্বরঃ সর্ব্বভূতানাং হৃদ্দেশেঽর্জ্জুন তিষ্ঠতি ২ ভ্রাময়ন্ সর্ব্বভূতানি যন্ত্রারূঢ়ানি মায়য়া ॥ ৬১ ॥ তমেব শরণং গচ্ছ
সর্ব্বভাবেন ভারত ২ তৎপ্রসাদাৎ পরাং শান্তিং স্থানং প্রাপ্স্যসি শাশ্বতং ॥ ৬২॥ ৬২ ॥ শ্রী৬২ ॥ ৬২ ॥

পারতন্ত্র্যমুক্তং ঈশ্বরপারতন্ত্র্যমাহ ঈশ্বর ইতি দ্বাভ্যাং। সর্ব্বভূতানাং হৃদি মধ্যে ঈশ্বরোঽন্তর্যামী তিষ্ঠতি। কিং কুর্ব্বন্ সর্ব্বভূতানি মায়য়া নিজশক্ত্যা ভ্রাময়ন্ তত্তৎকর্ম্মসু প্রবর্ত্তয়ন্। যথা দারুযন্ত্রমারূঢ়ানি কৃত্রিমাণি ভূতা
নি সূত্রধারো লোকে ভ্রাময়তি তদ্বদিত্যর্থঃ। যদ্বা যন্ত্রাণি শরীরাণ্যারূঢ়ানি ভূতানি দেহাভিমানিনো জীবানিত্যর্থঃ ২ তথা চ শ্রুতিঃ একো দেবঃ সর্ব্বভূতেষু গূঢ়ঃ সর্ব্বব্যাপী সর্ব্বভূতান্তরাত্মা ২ কর্ম্মাধ্য
ক্ষঃ সর্ব্বভূতাধিবাসঃ সাক্ষী চেতা কেবলো নির্গুণশ্চেতি। য আত্মনি তিষ্ঠন্নাত্মনোঽন্তরো যমাত্মা ন বেদ যস্যাত্মা শরীরং য আত্মানমন্তরো যময়তি এষ ত আত্মান্তর্য্যাম্যমৃত ইতি ॥৬১॥ যস্মাদে
বং সর্ব্বজীবাঃ পরমেশ্বরপরতন্ত্রাস্তস্মাত্তমেবেতি। তস্মাদহঙ্কারং পরিত্যজ্য সর্ব্বভাবেন সর্ব্বাত্মনা তমীশ্বরমেব শরণং গচ্ছ। ততস্তস্যৈব প্রসাদাৎ পরমামুপশান্তিং স্থানঞ্চ পারমেশ্বরং নিত্যং প্রাপ্স্যসি ॥৬২॥

সর্ব্বগীতার্থমুপসংহরন্নাহ ইতীতি । ইত্যনেন প্রকারেণ তে তুভ্যং সর্ব্বজ্ঞেন পরমকারুণিকেন ময়া জ্ঞানমাখ্যাতমুপদিষ্টং । কথম্ভূতং গুহ্যাদ্গোপ্যাদ্গুহ্যং মন্ত্রযোগাদিজ্ঞানাদপি গুহ্যতরং এতন্ময়োপদিষ্টং গীতাশাস্ত্রম
শেষতো বিমৃশ্য পর্য্যালোচ্য পশ্চাদ্যথেচ্ছসি তথা কুরু । এতস্মিন্ পর্য্যালোচিতে তব মোহো নিবর্ত্তিষ্যতীতি ভাবঃ ॥ ৬৩ ॥ অতিগম্ভীরং গীতাশাস্ত্রমশেষতঃ পর্য্যালোচয়িতুমশক্তস্য
কৃপয়া স্বয়মেব তস্য সারং সংক্ষিপ্য কথয়তি সর্ব্বগুহ্যতমমিতি ত্রিভিঃ । সর্ব্বেভ্যো গুহ্যতমং মে বচঃ অত্র প্রোক্তমপি ভূয়ঃ পুনরপি বক্ষ্যমাণং শৃণু । পুনঃপুনঃকথনে হেতুমাহ । ইষ্টোহসীতি মে অত্যন্তমিষ্টঃ । প্রিয়োহসীতি মত্বা
অতো হেতোঃ । ততস্তে হিতং বক্ষ্যামি । যদ্বা মম দৃঢ়মিষ্টোহসি । ময়া বক্ষ্যমাণং চ সর্ব্বপ্রমাণোপেতমিতি নিশ্চিত্য ততো বক্ষ্যামীত্যর্থঃ । দৃঢ়মতিরিতি কেচিৎ পঠন্তি ॥ ৬৪ ॥ তদেবাহ । মন্মনা ইতি । মন্মনা

ইতি তে জ্ঞানমাখ্যাতং গুহ্যাদ্গুহ্যতরং ময়া । ২ বিমৃশ্যৈতদশেষেণ যথেচ্ছসি তথা কুরু ॥ ৬৩ ॥ সর্ব্বগুহ্যতমং ভূয়ঃ শৃণু মে পরমং বচঃ ২
ইষ্টোহসি মে দৃঢ়মিতি ততো বক্ষ্যামি তে হিতং ॥ ৬৪ ॥ মন্মনা ভব মদ্ভক্তো মদ্যাজী মাং নমস্কুরু । ২ মামেবৈষ্যসি সত্যং তে প্রতি
জানে প্রিয়োহসি মে ॥ ৬৫ ॥ সর্ব্বধর্ম্মান্ পরিত্যজ্য মামেকং শরণং ব্রজ । ২ অহং ত্বাং সর্ব্বপাপেভ্যো মোক্ষয়িষ্যামি মা শুচঃ ॥ ৬৬ ॥
ইদং তে নাতপস্কায় নাভক্তায় কদাচন । ২ ন চাশু শ্রূষবে বাচ্যং ন চ মাং যোহভ্যসূয়তি ॥ ৬৭ ॥ ৬৭ ॥

ইতি । মন্মনা ভব মচ্চিত্তো ভব মদ্ভক্তো ভব । মদ্যাজী মদ্যজনশীলো ভব । মামেব নমস্কুরু । এবং বর্ত্তমানস্ত্বং মৎপ্রসাদাল্লব্ধজ্ঞানেন মামেবৈষ্যসি প্রাপ্স্যসি । অত্র সংশয়ং মা কার্ষীঃ । ত্বং মম প্রিয়োহসি ।
অতঃ সত্যং যথা ভবত্যেবং তুভ্যমহং প্রতিজানে প্রতিজ্ঞাং করোমি ॥ ৬৫ ॥ ততোহপি গুহ্যতমমাহ সর্ব্বেতি । মদ্ভক্ত্যৈব সর্ব্বং ভবিষ্যতীতি মম দৃঢ়বিশ্বাসেন বিধিকৈঙ্কর্য্যং ত্যক্ত্বা মামেকং শরণং ব্রজ ।
এবং বর্ত্তমানঃ কর্ম্মত্যাগনিমিত্তং পাপং স্যাদিতি মা শুচঃ শোকং মা কার্ষীঃ । যতস্ত্বামেকশরণং সর্ব্বপাপেভ্যো মোক্ষয়িষ্যামি ॥ ৬৬ ॥ এবং গীতার্থতত্ত্বমুপদিশ্য তৎসম্প্রদায়
প্রবর্ত্তনে নিয়মমাহ । ইদমিতি । ইদং গীতার্থতত্ত্বং তে ত্বয়া অতপস্কায় স্বধর্ম্মানুষ্ঠানহীনায় ন বাচ্যং । ন চাভক্তায় গুরাবীশ্বরে চ ভক্তিশূন্যায় কদাচিদপি ন বাচ্যং । ন চাশুশ্রূষবে পরিচর্য্যামকুর্ব্বতে বাচ্যং । মাং পর
১ মেশ্বরং যোহভ্যসূয়তি মনুষ্যদৃষ্ট্যা দোষারোপেণ নিন্দতি তস্মৈ চ ন বাচ্যং ॥ ৬৭ ॥

এতদ্গীতাশাস্ত্রোপদেষ্টুঃ ফলমাহ : য ইমমিতি : মদ্ভক্তেষ্বভিধাস্যতি : মদ্ভক্তেভ্যো ব্যাখ্যাস্যতি : স ময়ি পরাং ভক্তিং করোতি ততো নিঃসংশয়ঃ সন্ মামেব প্রাপ্নোতি ॥৬৮॥ কিঞ্চ নচেতি তস্মান্
মদ্ভক্তেভ্যো গীতাশাস্ত্রব্যাখ্যাতুঃ সকাশাদন্যো মনুষ্যেষু মধ্যে কশ্চিদপি মম প্রিয়কৃত্তমঃ অত্যন্তং পরিতোষকর্ত্তা নাস্তি : ন চ কালান্তরেঽপি ভবিতা ভবিষ্যতি : মমাপি তস্মাদন্যঃ প্রিয়তরো ভুবি ভূলোকে ভবিতা নাস্তি : ন চ কাল
ান্তরেঽপি ভবিষ্যতীত্যর্থঃ ॥৬৯॥ পাঠতঃ ফলমাহ : অধ্যেষ্যত ইতি : আবয়োঃ শ্রীকৃষ্ণার্জ্জুনয়োরিমং ধর্ম্যং ধর্ম্মাদনপেতং সম্বাদং যোঽধ্যেষ্যতে জপরূপেণ পঠিষ্যতি : তেন পুংসা সর্ব্বযজ্ঞেভ্যঃ শ্রেষ্ঠেন জ্ঞানযজ্ঞেনা
হমিষ্টঃ স্যামিতি মে মতির্নিশ্চিতেতি : যদ্যপি : অসৌ গীতার্থমবুধ্যমানঃ কেবলং জপতি তথাপি মম তৎ শৃণ্বতো মামেবাসৌ প্রকাশয়তীতি বুদ্ধির্ভবতি : যথা লোকে যদৃচ্ছয়াপি যদা কশ্চিৎ কস্যচিৎ নাম গৃহ্ণাতি

য ইমং পরমং গুহ্যং মদ্ভক্তেষ্বভিধাস্যতি । ভক্তিং ময়ি পরাং কৃত্বা মামেবৈষ্যত্যসংশয়ঃ ॥ ৬৮ ॥ নচ তস্মান্মনুষ্যেষু কশ্চিন্মে প্রিয়কৃত্তমঃ । ভবিতা ন চ মে তস্মা

গী ৭৮ দন্যঃ প্রিয়তরো ভুবি ॥ ৬৯ ॥ অধ্যেষ্যতে চ য ইমং ধর্ম্যং সম্বাদমাবয়োঃ । জ্ঞানযজ্ঞেন তেনাহমিষ্টঃ স্যামিতি মে মতিঃ ॥ ৭০ ॥

শ্রদ্ধাবাননসূয়শ্চ শৃণুয়াদপি যো নরঃ । সোঽপি মুক্তঃ শুভাল্লোকান্ প্রাপ্নুয়াৎ পুণ্যকর্ম্মণাং ॥ ৭১ ॥ কচ্চিদেতচ্ছ্রুতং পার্থ ত্বয়ৈকাগ্রেণ চেতসা । কচ্চিদজ্ঞা

নসম্মোহঃ প্রনষ্টস্তে ধনঞ্জয় ॥ ৭২ ॥ অর্জ্জুন উবাচ ॥ নষ্টো মোহঃ স্মৃতির্লব্ধা ত্বৎপ্রসাদান্ময়াচ্যুত । স্থিতোঽস্মি গতসন্দেহঃ করিষ্যে বচনং তব ॥ ৭৩ ॥

তদাসৌ মামাহ্বয়তীতি মত্বা তৎপার্শ্বমাগচ্ছতি তথাহমপি তস্য সন্নিহিতো ভবেয়ং : যথা মন্ত্রজাপিনস্তথৈবেত্যর্থঃ প্রশংসার্থমর্থঃ কশ্চিৎ নামোচ্চারণমাত্রেণ প্রসন্নোঽস্মি তথৈব তস্য প্রসন্নো ভবেয়ং জপিতুঃ ॥৭০॥ অন্যস্য জপতো যোঽন্যঃ ক
শ্চিচ্ছৃণোতি তস্যাপি ফলমাহ : শ্রদ্ধাবানিতি : যো নরঃ শ্রদ্ধাযুক্তঃ কেবলং শৃণুয়াদপি শ্রদ্ধাবানপি কশ্চিৎ কিমর্থময়মত্রৈর্জপতি : অথবা অয়ং জপতীতি বাদদোষদৃষ্টিকর্ত্তা ভবতি তন্নিবৃত্ত্যর্থমাহ : অনসূয়শ্চ : অসূয়ারহি
তোঽয়ং শৃণুয়াৎ : সোঽপি সর্ব্বৈঃ পাপৈর্মুক্তঃ সন্নশ্বমেধাদিপুণ্যকৃতাং লোকান্ প্রাপ্নুয়াৎ ॥ ৭১ ॥ সম্যগ্বোধাভাবপ্রাপ্তৌ পুনরুপদেশ্যামীত্যাশয়েনাহ : কচ্চিদিতি প্রশ্নার্থে : অজ্ঞানসম্মোহঃ তত্ত্বাজ্ঞানকৃতো বিপর্য্যয়ঃ
সম্প্রতি নষ্টঃ ॥ ৭২ ॥ কৃতার্থঃ সন্নর্জ্জুন উবাচ ॥ নষ্টো মোহ ইতি : আত্মবিষয়ো মোহো নষ্টঃ : অতএব স্মৃতিরাত্মস্বরূপানুসন্ধানরূপা : যা লব্ধা ত্বৎপ্রসাদাৎ ময়া লব্ধা প্রাপ্তা : অতঃ
স্থিতোঽস্মি যুদ্ধায়োদ্যতোঽস্মি : গতো ধর্ম্মবিষয়ঃ সংশয়ো যস্য : অতোঽহং তবাজ্ঞাং করিষ্যামীতি ॥ ৭৩ ॥

তদেবং ভগবতঃ প্রতি শ্রীকৃষ্ণার্জুনসম্বাদং কথয়িত্বা প্রস্তুতাং কথামুপসংহরন্ সঞ্জয় উবাচ ইত্যহমিতি : রোমহর্ষণং রোমাঞ্চকরং সম্বাদমশ্রৌষং শ্রুতবানহং স্পষ্টমন্যৎ ॥ ৭৪ ॥ আত্মনস্তদ্‌শ্রবণসম্ভাবনামাহ ব্যাসপ্রসা
দাদিতি : ভগবতা ব্যাসেন দিব্যং চক্ষুঃশ্রোত্রাদি মহ্যং দত্তং : ততো ব্যাসপ্রসাদাদেতচ্ছ্রুতবানস্মি : কিন্তদিত্যপেক্ষায়ামাহ : পরং যোগং পরমমাবিষ্কারেণেতি : যোগেশ্বরাৎ কৃষ্ণাৎ স্বয়মেব সাক্ষাৎ কথয়তঃ শ্রুত
বান্ ॥ ৭৫ ॥ কিঞ্চ রাজন্নিতি : হৃষ্যামি রোমাঞ্চিতো ভবামি মুহুঃ প্রতিক্ষণমিতি বা স্পষ্টমন্যৎ ॥ ৭৬ ॥ কিঞ্চ তচ্চেতি : তচ্চ বিশ্বরূপমতিদর্শয়তি : স্পষ্টমন্যৎ ॥ ৭৭ ॥ অতস্ত্বৎপুত্রাণাং রাজ্যাদিশঙ্কাং পরিত্যজ্যতাম্
শয়েনাহ : যত্রেতি : যত্র যেষাং পক্ষে যোগেশ্বরঃ শ্রীকৃষ্ণো বর্ত্ততে : যত্র চ পার্থো গাণ্ডীবধন্বা ধনুর্দ্ধরঃ : তত্রৈব শ্রীরাজলক্ষ্মীঃ তত্রৈব চ বিজয়শ্চ তত্রৈব ভূতিরুত্তরোত্তরাভিবৃদ্ধিশ্চ : নীতির্ন্যায়োপি তত্রৈব ধ্রুবা নিশ্চিতা

সঞ্জয় উবাচ ॥ ইত্যহং বাসুদেবস্য পার্থস্য চ মহাত্মনঃ । ২ সম্বাদমিমমশ্রৌষমদ্ভুতং রোমহর্ষণং ॥ ৭৪ ॥ ব্যাসপ্রসাদাচ্ছ্রুতবানেত
দ্গুহ্যমহং পরং ২ যোগং যোগেশ্বরাৎ কৃষ্ণাৎ সাক্ষাৎ কথয়তঃ স্বয়ং ॥ ৭৫ ॥ রাজন্ সংস্মৃত্য সংস্মৃত্য সম্বাদমিমমদ্ভুতং ২
কেশবার্জুনয়োঃ পুণ্যং হৃষ্যামি চ পুনঃ পুনঃ ॥ ৭৬ ॥ তচ্চ সংস্মৃত্য সংস্মৃত্য রূপমত্যদ্ভুতং হরেঃ ২ বিস্ময়ো মে মহান্ রাজন্ হৃষ্য
মি চ পুনঃ পুনঃ ॥ ৭৭ ॥ যত্র যোগেশ্বরঃ কৃষ্ণো যত্র পার্থো ধনুর্দ্ধরঃ ২ তত্র শ্রীর্বিজয়ো ভূতির্ধ্রুবা নীতির্মতির্মম ॥ ৭৮ ॥

তি সর্ব্বত্রেতি : মম মতির্নিশ্চয়ঃ : অতো ইদানীমপি তাবৎ সপুত্রস্য শ্রীকৃষ্ণং শরণং গত্বা পাণ্ডবান্ প্রসাদ্য সর্ব্বস্বং তেভ্যো নিবেদ্য প্রাণরক্ষাং কুর্ব্বিতি ভাবঃ ॥ ৭৮ ॥ ভগবদ্ভক্তিযুক্ত
স্য তৎপ্রসাদাদাত্মবোধতঃ ২ স্বর্গলোকবিমুক্তিঃ স্যাদিতি গীতার্থসংগ্রহঃ ॥ তথাপি পূর্ব্বং সম্প্রাপ্য পার্থজ্ঞানযন্ত্রনন্যয়া । ভক্ত্যা ত্বনন্যয়া শক্যোঽহমেবংবিধোঽর্জুনেত্যাদৌ :
ভগবদ্ভক্তের্মোক্ষসাধকত্বশ্রবণাৎ তদেকান্তভক্তিরেব তৎপ্রসাদাজ্জ্ঞানাদিহান্তরব্যাপারেণ মোক্ষহেতুরিতি স্ফুটং প্রতীয়তে : জ্ঞানস্য ভক্ত্যবান্তরব্যাপারত্বমেবাহ : তেষাং সততযুক্তানাং
ভজতাং প্রীতিপূর্ব্বকং ২ দদামি বুদ্ধিযোগং তং যেন মামুপযান্তি তে : মত্ত একত্র তিষ্ঠতামন্যস্তারায়োপপাদ্যতে ইতি বচনাৎ : ন চ জ্ঞানমেব ভক্তিরিতি মন্তব্যং : সমঃ সর্ব্বেষু ভূতেষু মদ্ভক্তিং

ন্তরেপরং । স্বাত্মানামতিজানাতীত্যোদো ভেদনির্দেশাৎ । নচৈবং সতি তমেব বিদিত্বাতিমৃত্যুমেতি নান্যঃ পন্থা বিদ্যতেঽয়নায়েতি শ্রুতিবিরোধঃ শঙ্কনীয়ঃ তজ্জেয়রাত্তর
প্রাপ্তজ্ঞানস্য ॥ নহি কাষ্ঠৈঃ পচতীত্যুক্তে জ্বালাদীনাং অসাধনত্বমুক্তং ভবতি ॥ কিঞ্চ যস্য দেবে পরা ভক্তির্যথা দেবে তথা গুরৌ । ত
স্যৈতে কথিতা হ্যর্থাঃ প্রকাশন্তে মহাত্মনঃ ॥ দেহান্তে দেবঃ পরং ব্রহ্ম তারকং ব্যাচষ্টে । যমেবৈষ বৃণুতে তেন লভ্য ইত্যাদি শ্রুতি স্মৃতি পুরাণবচনানি চৈবং সতি সমঞ্জসা
নি ভবন্তি ॥ তস্মাদ্ভগবদ্ভক্তিরেব মোক্ষহেতুরিতি সিদ্ধং ॥ তেনৈব দত্তয়া মত্যা তদ্গীতাবিবৃতিঃ কৃতা । স এব

২১৭ ॥ ॥ ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতা যাং ভীষ্মপর্ব্বণি ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং সন্ন্যাসযোগো নামাষ্টাদশোধ্যায়ঃ
॥ ❀ ॥ গজযুগ্মাদ্রিচন্দ্রে চ শাকে বর্ষে মাঘে শুভে । অলেখি ভগবদ্গীতা শ্রীমহেশ্বরশর্ম্মণা ॥ ॥ ১৭২৮ ॥ শক ॥

পরমানন্দরূপায় প্রীণাতু মাধবঃ ॥ শ্রীপরমানন্দপাদাব্জরজঃশ্রীধারিণামুনা । শ্রীধরস্বামিযতিনা কৃতা গীতাসুবোধিনী ॥ স্বপ্রাগল্ভ্য
নার্হিনো ভগবদ্গীতা দর্শিতা । তত্ত্বং প্রেম্ণাঃ স্বপ্নকৌতুকাৎ কৃপাপীযূষবৃষ্টিভিঃ । অর্থস্য জনিতাম্লিতযজনবেশাদি স্বয়ং মনীষিণঃ তত্ত্বং কিন্নিমজ্জতি জনঃ স
দুর্ব্বিধাপ্তির্ন । ॥ সুবোধবোধনীং যস্যাং শোধয়ন্তু সুবোধনীং । জগদামোদনীমেতাং বুধা বোধসুধানদীং ॥ ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং ভীষ্মপর্ব্বণি ভ
গবদ্গীতাসূপনিষৎসু টীকায়াং সুবোধিন্যাং আনন্দনন্দন্যাং শ্রীধরস্বামিবিরচিতায়াং পরমার্থনির্ণয়ো নামাষ্টাদশোধ্যায়ঃ ॥ ওঁ নমো ভগবতে বাসুদেবায় ॥ ❀ ॥

।শ্ৰীকৃষ্ণায়নমঃ ॥ ওঁ যৎকীৰ্ত্তনং যৎস্মৰণং যদীক্ষণং যদ্বন্দনং যচ্ছ্ৰৱণং যদৰ্হণং । লোকস্য সদ্যো বিধুনোতি কল্মষং তস্মৈ সু
ভদ্ৰশ্ৰৱসে নমো নমঃ ॥ কিৰাতহূণান্ধ্ৰপুলিন্দপুক্কসা আভীৰকঙ্কা যবনাঃ খসাদয়ঃ । যেঽন্যে চ পাপা যদপাশ্ৰয়াশ্ৰয়াঃ
শুধ্যন্তি তস্মৈ প্ৰভৱিষ্ণৱে নমঃ ॥ নানাগ্ৰন্থান্ সমালোক্য বিচাৰ্য্য চ পুনঃ পুনঃ । মালিকা শ্ৰৱণশ্ৰেষ্ঠা তন্যতে ৰত্নমো
চনী ॥ তত্ৰ প্ৰথমং সদ্গুৰুচৰণমেৱাশ্ৰয়েৎ তত্ত্বৈতৰ নীস্তৰী ভগৱদ্ভক্তিৰ্ন্ন কদাচিদ্ভৱতীতি গুৰুনৰ্ক্কন
শ্ৰী।১ মাহ পৰাশৰসংহিতায়াং ॥ শ্ৰীমদ্ভাগৱতোক্তধৰ্ম্মবি যয়ে চিত্তং যদীয়ং তৰে শ্ৰীৰ্জ্জ্ঞস্বৰৱৃন্দবন্দিতপাদ্ভক্তি
ৰ্গথাৰম্ভৰেঃ । মাজানন্নপি শাস্ত্ৰবিস্তৰময়ং শ্ৰেষ্ঠো গুৰুঃ কথ্যতে ॥ শৰনসংহিতায়াং ॥ ভক্তিভাগৱ
ন্নামে যস্য বাচি প্ৰৱৰ্ত্ততে । তক্তে থা শ্ৰৱনে কন্নৌ চক্ষুৰী শ্ৰীৱদৰ্শনে । শিৰস্তু বন্দনে যস্য ভাগৱত্ত্ৰেতি মাদিষু ।
তস্মৈ মমৰ্প্পিতেন্নাদৌ জিহ্বা যস্য প্ৰৱৰ্ত্ততে । এৱন্তু সদ্গুৰুং ত্যক্ত্বা শ্ৰীকৃষ্ণং তত্ত্বতঃ । শ্ৰাম্ৰেণেন বিহীনোপি সদ্গু
ৰেদান্তাদিকৰেদকোপিভাগৱতত্ত্বাবিহীনঃ পশুঃ ॥১॥

নন্দযশোদাবানগোপানাং মুকুট কুণ্ডলোজ্জ্বলং । শ্রীবৎসকৌস্তুভাবক্ষঃ বনমালাবিরাজিতঃ ।
কৃষ্ণনামৈর্বিবিধৈঃ সংস্তুবং পাদপঙ্কজং । লীলানন্দগীতরসনৈঃ গোকুলানন্দবর্দ্ধনং
বামপাণিঃ শঙ্খচক্রগদাপদ্মদক্ষিণে সংস্থাপকঃ । বামশঙ্খচক্রপীতবংশীঃ কমলনাভিঃ ম

আনুকুল্যেচ সংকল্পঃ প্রাতিকূল্য বিবর্জনং।
রক্ষিষ্যতীতি বিশ্বাসো গোপ্তৃত্বে বরনং তথা ॥
আত্মনিক্ষেপ কার্পণ্যে ষড় বিধা শরণাগতিঃ ॥ হরিভক্তিবিলাসে শ্রীবৈষ্ণবতন্ত্রে ॥